# प्रथमप्रकरणम्

# वैदिकवाङ्मयम् एकम् अवलोकनम् ॥

१.१ वेदपरिचयः

१.२ वेदशब्दार्थ निरूपणम्

१.३ वेदशब्दस्य पारिभाषिकार्थः

१.४ वेदशब्दस्य व्यत्पत्तिविचारः

१.५ वेदशब्दस्य पर्यायवाचिनश्शब्दाः

१.६ वेदानां महत्वम्

१.७ वेदानां प्रादुर्भावविभाजनविषये मतम्

१.८ ऋग्वेदस्य परिचय वैशिष्ट्यञ्च

१.९ ऋग्वेदस्य महत्वम्

१.१० यजुर्वेदपरिचयः वैशिष्टयञ्च

१.११ सामवेदस्य परिचयः वैशिष्ट्यञ्य

१.१२ वेदोत्तर वैदिक साहित्यपरिचयः

# प्रथम प्रकरणम्
# वैदिकवाङ्मयम् एकम् अवलोकनम् ॥

## १.१ वेदपरिचयः

निखिलेऽस्मिन् जगतितले नैकविधप्राणिनो निवसन्ति । ते सर्वेऽपि सदैव सुखमेवापेक्षन्ते । परन्तु तेषां केचन बहवः स्वकर्मपरिणाममनुभवन्तो दुःखिनोऽपि दरीदृश्यन्ते । तस्य कारणान्वेषणं कुर्मश्चेत्तर्हि विज्ञातुं शक्यते यत् वर्तमानसमये युगे वा जनाः धर्मपथविमुखाः सदाचारभ्रष्टाः भुत्वा शान्तिंनाधिगच्छन्ति । समेषामपि कल्याणाय सांस्कृतिकं, धार्मिकश्च विज्ञानं नितरामावश्यकम् । धर्मतत्वाचरणाभावात् मानवाः पशुतुल्याः, पथभ्रष्टाश्च भवन्ति । सर्वमेतत् विलोक्य नित्यमाचरणं, नित्यकर्म वा किम् ? कर्तव्याकर्तव्यं किम् ? शाश्वतसुखस्य किं साधनम् ? एते नैके विविधप्रश्नाः मनसि समुद्भवन्ति । समेषामेतेषां समाधानमधिगन्तुं जिज्ञासयां धर्ममूलस्यैव संशोधनं, गवेषणंवातीव महत्वपूर्णं विद्यते । तदस्ति यत्

"वेदोऽखिलो धर्ममूलम्"[१]

संस्कृतसाहित्यार्णवे वेदानां स्थानं सर्वोपरि राराजते । मानवसभ्यतायाः, संस्कृतेश्च आधारभूतग्रन्थाः वेदा एव । अस्मदीयायाः भारतवर्षस्य समस्तधर्मव्यवस्थायाः आधारस्तम्भाः वेदा एव वर्तन्ते । एतादृशेषु वेदेषु न केवलं धार्मिकज्ञानमपितु, सामाजिकं, सांस्कृतिक, भौतिकं, वैज्ञानिकादि सकल विषयसम्बन्धि ज्ञानं विद्यमानमस्ति ।

---

१ मनुस्मृति २/६

अत एव स्पष्टमिदं वैदिकज्ञानं भारतीयसंस्कृते: प्राचीनतमं सर्वश्रेष्ठञ्च कल्पतरूसदृशं विज्ञानेन सम्मतं ज्ञानं प्रतीयते तत्र नास्ति शङ्कास्थानम् । अत: विद्वांसो मन्यन्ते यत् वेदा: परमात्मनो वाणीस्वरूपा: नापितु परमात्मस्वरूपा एव सन्ति । न केवलं भारतीय: प्रज्ञापुरूषा: अपितु वैदिशिका: विद्वांसोऽपि वेदानां वैज्ञानिकविचारधारां प्राचीनत्वञ्च स्वीकुर्व्रन्ति ।

एतादृशेषु ज्ञानराशिग्रन्थेषु वेदेषु भूतभविष्यवर्तमानानां सूक्ष्मातिसूक्ष्मं ज्ञानं सरलतया निहितमस्ति । सर्वेषां जीवानां ज्ञानविज्ञानानां मूलस्रोतस्वरूपा: वेदा एव । अतो हि मनुनापि कथितमिदम् –

"सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक् ।[१]

वेद शब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥

श्लोकोऽयं सृष्टिचक्रस्यास्या प्रारम्भ: कस्माज्जात: । सर्वेषामपि प्राणिनां विकास–आत्राया: बीजं किमस्ति ? तस्य प्रतिपादको वर्तते । अनेनैव वेदस्याद्यत्वं स्वीक्रियते । स्वयं भगवान वेदोऽपि सिद्धान्तमिदं परिपोषयति, यत केन प्रकारेण भगवत: सङ्कल्पमात्रेण सृष्टिरचना सञ्जाता । जीवानाञ्च कर्मानुसारेण प्रादुर्भावोऽभवत् ।

## १.२ वेदशब्दार्थनिरूपणम्

अथ कोऽयं वेद: ? तत्रोच्यते – "विद्यन्ते ज्ञायन्ते लभ्यन्ते वा धर्मादिपुरूषार्था एभिरिति वेदा: ।" ज्ञानार्थकाद् विद् धातोर्धञि प्रत्यये रूपमिदं सिद्धयति । सायणेन पुन: कृष्णयजुर्वेदीयभाष्यभूमिकायाम् उपन्यस्तम् ।

---

१ मनुस्मृति १–२१

प्रत्यक्षेणानुमित्या वा यस्तुपायो न विद्यते ।[1]

एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

एवं वेदो हि नाम अशेषज्ञानविज्ञानराशिः । एवं वेदभारतीयविद्यायाः सर्वाधिक मूल्यवान् निधिरस्ति । समस्तविदूषां मान्यता विद्यते यत् वेदाः भारतीयस्य न केवलम् अपितु समग्रविश्वस्य तत्त्वज्ञानात्मकनिधेः ग्रन्थोऽस्ति ।

**१.३ वेदशब्दस्य पारिभाषिकार्थ :**

वेदशब्दस्य परिभाषास्वीकारे नैकेषां विदुषां, ग्रन्थकाराणाञ्च विमतैक्यं प्रतीयते । तथापि तत्र ज्ञानात्मक विचारो दृश्यते । यथा –

'इष्टप्राप्त्यनिष्ठपरिहारयोरलौकिकमुपायं यो वेदयते स वेदः' इति सायणेन प्रतिपादितम् ।

अतः वेदः खलु अशेषविश्वविज्ञानविशेष परिज्ञानप्रदं शाश्वतिकमपौरूषेयं शास्त्रम् । अपौकषेयमग्रे वक्ष्यामः

ऋक्प्रातिशाख्यस्य व्याख्यायां विष्णुमित्रः वेदं परिभाष्यति यथा –

'विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिधर्मादि पुरूषार्था इति वेदाः ।[2]

इत्थं परिभाषेयं विज्ञापयति यत् वेदोऽयं मानवानां परमकल्याणकारिणां पुरूषार्थचतुष्णां संसाधकत्वेनविराज त इति निःसन्देहत्वेन वक्तुं शक्यते ।

'भारतं पञ्चमो वेदाः' एतादृशे महाकाव्ये महाभारते भीष्मयुधिष्ठिरसंवादान्तगते भीष्मेण 'वेदशब्दद्वारा' भगवतः श्रीविष्णोः उल्लेखः कृतः । अनेन विज्ञायते यत् वेदो नाम साक्षान्नारायणः । अर्थात् –

१ कृष्णयजुर्वेदीयभाष्यभुमिका

२ ऋग्वेदकालीन भारत

'वेदो नारायण: साक्षात्'

'पुराणानुसारं वेदशब्दस्य व्याख्यामवलोकयाश्चेत्तहि-ब्रह्ममुखनिर्गतधर्मज्ञापकशास्त्रमिति ।'

अर्थात् साक्षात् परब्रह्मण: मुखात् विनिर्गत् धर्मज्ञानप्रदायकं शास्त्रमेव वेदशब्देन व्यवह्रियते ।

दर्शनपरम्परायाः प्रसिद्धस्यवेदान्तशास्त्रानुसारं वेदपरिभाषाामित्थं विदधति वेदान्तिन: ।

''धर्मब्रह्मप्रतिपादकमपौरूषेयवाक्यमिति ।''

सङ्क्षेपेण वेदान्तिनां वेदपरिभाषास्ति 'अपौरूषेयं धर्मब्रह्मप्रतिपादकं वाक्यमेव वेद इति । मीमांसादर्शनस्य दार्शनिकाअपि तद्धदेवाङ्गीकुर्वन्ति प्ररिभाषापौरूषेयीम् ।

## १.४ वेदशब्दस्य व्युत्पत्तिविचार: ।

संस्कृतव्याकरणनुसारं वेदशब्द: चतुर्भ्य: धातुभ्य: विभिन्नार्थेषु निष्पद्यते, व्युत्पन्नो भवति वा ।

(१) विद् सत्तायाम् (२) विद् ज्ञाने

(३) विद् विचारणे (४) विद्लृ लाभे

यथैषा सुक्तिरियं सुप्रसिद्धास्ति । 'अपौरूषेया: वेदा:' अनया ज्ञायते वेदस्य कोऽपि जना: रचयिता नास्ति, तथैवास्य 'वेद' इति शब्दस्योच्चारणं प्रथमं केन विहितमित्यपि वक्तुं न शक्यते । तथापि पाणिनीयव्याकरणानुसारं वेदशब्दं पश्यामश्चेतज्ज्ञायते यत् शब्दोयं 'विद्' धातो: धञ्प्रत्ययो भूत्वा निष्पद्यते

। तेन वेदशब्दस्यार्थो भवति ज्ञानस्य सङ्ग्रहग्रन्थः । पाणिनीयशब्दशास्त्र विद्धातु चतुर्धा विभिन्नार्थेषु गणचतुष्टये प्राप्यते । यथा –

सतायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।[1]
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ॥

(१) अदादिगणपठितोऽयं धातुः ज्ञानार्थे वर्तते ।

(२) दिवादिगणपठितो विद्धातुः सतायां वर्तते ।

(३) तुदादिगणपठितः धातुः लाभार्थे विद्यते ।

(४) रूधादिगणपठितधातुरयं विचारणे वर्तते ।

अनेन ज्ञायते येन ज्ञानेन सर्वेक्षामपि लौकिकालौकिकपदार्थानामवबोधो जायते सः वेदः । इत्थं विभिन्नाचार्याः वेदशब्दस्यार्थं प्रदत्तवन्तः ।

महामुनिः पाणिनिः ञ्छादिगणे वृषादिगणे च वेदशब्दं द्विधा पठति । तत्रोञ्छादिगणे पठितशब्दः करणार्थे अन्तोदात्तः । वृषादिगणे पठितवेदशब्दः आद्युदात्तः वर्तते ।

तदेवं रीत्या सर्वेषामपि व्युत्पादनानां तत्पर्यविषयीभूतोऽर्थः समान एव । स च वेदानामखिलविद्यानिधानत्वेऽ पौरूषेयत्वे नित्यत्वे च पर्यवसितोऽवेक्षितव्य इति ।

## १.५ वेदशब्दस्य पर्यायवाचिनशशब्दाः

मन्त्रब्राह्मणात्मक, अपौरूषेयशब्दराशिवेदानां मुख्यरूपेण निम्नाङ्किताः

१ सि.कौ.चौ.का. पृ.२५३

पर्यायवाचकशब्दा: सन्ति ।

(१) श्रुति: स्त्री वेद आम्नाषस्त्रयी ।[१]

(२) आम्नाय: वैदिकमन्त्राणां शिक्षाग्रन्थेषु निर्दिष्टं[२] विधि एवं आचारसंहितयानुसारं पुन: अभ्यासकृते आम्नायतेभ्यस्ते ।

(३) आगम: – आगम् + अच् शास्त्रमात्रम् वेद: ।[३]

(४) त्रयी – सोऽयं वेद: त्रयोति पदेनाऽपि परिभाष्यते वस्तुतो वेदरचनायास्त्रैविध्यमेव वेदानांत्रयीन्वे बीजम् या खलु रचना पद्यमयी सा ऋगुच्यते या गद्यमयी सा यजु: या च पुनर्गानमयी सा सामेति । तदाङ्ग भगवज्जैमिनिमुनिपादा: ।

(५) निगम: – नि+गम् धातो: ज्ञानार्थकवाचकोऽयं वेदशब्दार्थवाची ।

(६) ब्रह्म – बृहि उद्यमने धातो: निष्पन्ने पदमिदम् ।

(७) छन्द: – 'छन्दस्' शब्दोऽपि वेदशब्दार्थवाची ।

## १.६ वेदानां महत्वम् ।

वेदस्य व्याकरणानुसारं व्युत्पत्तिं दृष्ट्वा वेदमहत्त्वं स्पष्टतया ज्ञातुं शक्यते । अद्यपर्यन्तं अस्माकं देशे ये आस्तिकमतावलम्बिन: आचार्य:

---

१ अमरकोश: १/६१३

२ वैदिक साहित्य का इतिहास ।

३ ब्राह्मण ग्रंथो में नारी ।

सञ्जाताः ते वेदानेव समस्तविद्यानां बीजस्वरूपान् अमन्यन्त । सर्ववाङ्मयस्य मुख्याचारस्वरूपाः वेदा एवेति तेषां मतम् ।

वेदास्तु भगवतः निश्वासरूपाः सन्ति । ते नित्यास्सन्ति अतः तेषां नित्यत्वात्, कदापि तज्ज्ञानस्यनाशो न भवति तथा च यस्य विनाशो न भवति तस्योत्पत्तिरपि न भवितुं शक्यते, किन्तु युगान्तेऽन्तर्हितान् वेदान् प्रयापतिः तपसा लेभे । वेदानामपौरूषेयत्वं स्वीक्रियते ।

वेदवाणी समस्तप्राणिनाङ्कृते कल्याणस्वरूपा वर्तते । भारतीयाः आर्यजनाः वदेषु प्रामाव्यबुद्धियुक्ता आसन् । अन्येषां शास्त्राणां प्रामाण्यमपि वेदानुकूलात्वादेव स्वीक्रियते । वेदविरूद्धः कोऽपि ग्रन्थः प्रामाणिकतां न प्राप्नोति । मनुनापि 'प्रमाणं परमं श्रुतिः[१] इत्यादिभिः शब्दैः वेदप्रामाण्यं स्वीकृतमस्ति । कणादाचार्येणापि 'तद्वचनात् आम्नायस्य प्रामाण्यम्'[२] सुत्रेऽस्मिन् वेदानां भगवद्वचनात् प्रामाण्यं स्वीकृतम् ।

आद्यशङ्कराचार्योऽपि वेदान्तस्य 'अत एव च नित्यत्वम् । (१/३/२९) सूत्रस्य व्याख्यावसरे वेदानामेव प्रथमं स्वीकार । वाक्यपीयकारेण भर्तृहरिणा स्वकीये ग्रन्थे लिखितम् ।

सत्या विशुद्धिः तत्रोक्ता विद्यैवैकपदागमा
युक्ता प्रणवरूपेण सर्ववादाविरोधिनी ।
विद्यातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः ॥[३]

---

१ मनूस्मृति
२ ब्रह्मसुत्र १/३/२९
३ वाक्यपदीयम् १-९-१० ।

अनेन ज्ञातुं शक्यते यत् एकपदागमा विद्यैव सत्यरूपा वर्तते । तत्रैव परमविशुद्धिः वर्तते । अन्यत्र मानवनिर्मितविद्यासु अशुद्धयो भवन्त्येव । वेदविद्याः विशुध्ध वर्तते । वेदारम्भः ओंकारेण भवति । 'तस्य वाचकः प्रणवः[१] इत्यस्मिन्सूत्रे महर्षिपतञ्जलिना ओंकार एव भगवतः वाचकः इत्युल्लिखितः । अस्मिन्प्रणवे अ, उ, म् तिसृणां मात्राणां समावेशो जायते । प्रणवस्य 'अ' इति स्वरूपेण सह ऋग्वेदस्य उकारेण सह यजुर्वेदस्यैवञ्च 'म' इत्यनेन स्वरूपेण सह समावेदस्य सम्बन्धोऽस्ति । प्रणवेनैव तिसृणां महाव्याहृतीनां तथा त्रयाणां लोकानां प्रादुर्भावो जातः । अतः प्रणवजन्मा वेदविद्या वर्तते तेन सवादांश्च समर्थयति ।

ईश्वरवादः, जीववादः, प्रकृविादः, ज्ञनकाण्डः, कर्मकाण्डः, भक्तिकाण्डः, जैनधर्मसद्भावः, एकवादः, द्वैतवादः, त्रैतवादः, इत्येषां सर्वेषमपि प्रादुर्भाविः वेदविद्ययैवाभवत् । दार्शनिकैः कदा जीवस्यैवञ्च प्रकृतेः सम्बन्धस्य विषयः चर्चितः । कदा जीवस्यैवञ्च परमात्मनो विषये प्रकाशः प्रदर्शितः । तथा च कदाचित् प्रकृतिपरमेश्वरयोः विषये विचारःप्रकटीकृतः । वेदास्तु एतेषां त्रयाणामपि प्रवर्तकाः सन्ति । अतः तेषु त्रयाणामपि वादानां समाहारो दृश्यते ।

**वेदेषु वर्णाश्रमधर्मः**

वेदेषु मनुष्याणां कर्मादिभेदतः पञ्च श्रेणि विभागा दृश्यन्ते । ब्राह्मणः क्षत्रियः वैश्यः, दासः, दस्युञ्च । दस्युः खलु अनार्यः । आर्याश्चत्वारः । ते भेदाः पञ्चाज्जातिपदेन प्रचलिताः । परं सवैः जनैः परस्परं प्रीतिभावेन वर्तितव्यम् ।

---

१ पतिञ्जलयेगिसूत्रम्

"प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।[1]
प्रियं सर्वस्य पश्यतः उत शूद्र उतायै ॥

**चत्वार आश्रमाः**

मानवजीवनं चतुर्षु विभागेषु विभक्तं विद्यते । चत्वारो विभागाः चत्वार आश्रमा उच्यन्ते–ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–संन्यासलक्षणाः । पञ्च विंशतिवर्षपर्यन्तम् एकस्मिन्नाश्रमे विश्रम्य चत्वारोऽप्याश्रमाः सेव्याः, तेषु प्रथमः सर्वैरयरिहार्यत्वेन सेव्यः । गृहस्थादित्रयः आश्रमास्तु ऐच्छिाकाः । सोऽयं प्रथमः ब्रह्मचर्याश्रमः मानवजीवनस्याधारभूतः, अतः स एव शारीरिकीं मानसीं च शक्तिं विकासयति । तथा च

ब्रह्मचर्येण तपसा देवा मृत्युमुपाध्नत ।[2]
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्व रामरत ॥

ब्रह्मचर्यकाले ब्रह्यचारिणो गुरूकुलाश्रमे निवसन्तः आचार्यसकाशात् विविधा विद्याः, शिल्पकलाः, विज्ञानानि च शिक्षन्ते स्म निःशुल्कम् । ब्रह्ममचर्याश्रमानन्तरं गृहस्थाश्रमस्य चोपक्रमः विवाहसंस्कारेण सञ्जायते ।

**स्त्रीपुरूषयोः समानाधिकारः**

वेदेषु स्त्रीपुरूषयोः समानाधिकारः उपदिष्टः । उभयोः शिक्षा दीक्षा च पितृभ्यां समानभावेन सम्पादनीया । षोडश संस्कारेषु विवाहः खलु प्रधानतमः । अयं सम्बन्धः अविच्छेद्योऽग्निसाक्षिकः मैत्रीभावरूपः मन्त्रैर्नियन्त्रितः । प्राणिग्रहणानन्तरं वधूवरो जगदतुः ।

---

१ अथर्ववेद
२ अथर्ववेद

समञ्जन्तु विश्वे देवा समायो हृदयानि नौ ।
सम्मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥

पाणिग्रहणसंस्कारे प्रथमं तावत् पाणिग्रहणम्, ततो यज्ञाग्निपरिक्रमा, ततो लाजाहोमः, ततः शिलारोहणम्, ध्रुवदर्शनम्, सप्तपदी च । ततः परस्परं समानं सौहार्दं जायते । पति कुलमपि परिणीतायाः देव्याः गौरवास्पदं पदम् –

साम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रूवां भव ।
ननान्दिरे साम्राज्ञी भव साम्राज्ञी अधिदेवृषु ॥

विवाहसम्बन्धस्याविच्छेद्यत्वं वेदे वर्तते । एष विवाहसम्बन्धः न तात्कालिकोऽपितु नित्यः यावज्जीवन स्थायी च । तथा च वेदेऽयमादेशः यदेकः पतिः एकामेव पत्नीं परिणयेत । पत्न्यपि एकमेव पतिं वृणुयात् । अपि च वेदे भगिनी–भ्रातृविवाहः सर्वथा निषिद्धः ।

वेदानामपौरूषेयत्वं नित्पत्वं च प्रायः सर्वेऽपि प्राचीनाचार्याः स्वीचक्रुः । ''प्रलयकालेऽपि परमात्मनि वेदराशिः स्थितः'' इति भगवता कुल्लुकभट्टेन वेदानां नित्यत्वं प्रदर्शयतोक्तम् । वस्तुतः सृष्ट्युत्पत्तिसमकालमेव आदिमहर्षीणां हृदयेषु वेदज्ञानं प्रादुरभवत् ।

**वैदिकधर्मस्य स्वरूपम्**

वेदप्रतिपादितः धर्मः वैदिकधर्मः । वैदिकधर्म ईश्वरः अजरः, अमरः, शुद्धः, व्यापकः, सर्वशक्तिमान्, जगन्नियन्ता, सर्वज्ञः, न्यायशीलः, शुभाशुभकर्मफलदाता, सृष्टि–स्थिति प्रलयकर्ता च । तथा चोक्तम –

''तमेकं सत् विप्रा बहुधा वदन्ति ।

ईशास्यामिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥[१]

स एव ईश्वर उपास्याः ।

**वेदे मोक्षस्यानन्दः**

वेदे मोक्षानन्दस्वरूपस्य वर्णनं दृश्यते –

यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।

तस्मिन मां धेहि पवमावामृते लोके अक्षित इन्द्रायेन्दो परिस्रव ॥''[२]

यस्य च ज्योतिषा आत्मायं ज्योतिष्मान भवति तं स्तौति– एक एग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनुप्रभुतः । एकैवोषा सर्वमिदं विभात्येकं वा इदं विबभूव सर्वम् ॥[३]

**वेदे पुनर्जन्म** –

पुनर्जन्मसम्बन्धि अतिरमणीयं तत्वं ऋचो वर्णयन्ति –

''आ यो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुते पुरूषि ।

धास्युर्योनिं प्रथम आविवेश यो वाचमनुदितां चिकेत ।''[४]

''भूतस्य जातः पतिरेक आसीत् ।

यः देवेषु अधिदेव एक आसीत् ।''

अत्र परमात्मैव हिरण्यगर्भः तदुपाधिभूतानां पृथिव्यादीनां भौतिकानां

---

१ इशोपनिषद–१

२ ऋग्वेद

३ ऋग्वेद

४ अथर्ववेद

ब्रह्मणः सकाशादुत्पतेः स एव एकोऽद्वितीयः सन् भूतस्य विकारभूतस्य ब्रह्माण्डादेः पतिरासीत ।

**वेदेषु राष्ट्र–भावना :**

वेदेऽखिलमेवं विश्वं राष्ट्रत्वेनाभिमतम् । तादृशराष्ट्रस्य राजा तादृशो भवेत् यं सर्वाः प्रजाः वाम्छेयुः उक्तञ्च –

"ध्रुवं ते राजा वरूणो ध्रुवं देवो बृहस्पतिः ।[१]
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।"

"भद्रमिच्छन्त ऋषाय स्वर्विदस्तपो दीक्षामुप निषेदुरग्रे ।[२]
ततो राष्ट्रं बलमोजश्च जातं तदस्मै दैवा उपसंनमन्तु ।"

एतादृशस्य एकच्छत्रवतो राज्ञः राष्ट्रं जनकल्याणकारि भवेदत्र न संदेहो भवितुमर्हति, एवं विधोनृपः पर्वत इवाचलः सन् राष्ट्रं धारयति ।

**वेदे मांसभक्षणनिषेधः**

वेदे गोमांस मनुष्यमांस अश्वा दिमांसभक्षणस्य निषेधः । तथा हि

यः पौरूषेयेण क्रविषा समङ्क्ते यो अश्येन पशुना यातुधानः ।[३]
यो अध्न्याया भरति क्षीरभग्ने तेषां शीर्षाणिहरसा वि वृश्च ॥

पुरूष अश्वादिमांसभक्षयितुः शिरच्छेदो दण्डरूपेण विहितः ।
गोदुग्धपरिहर्तुश्चापि शिरच्छेदो व्यवस्थितः ।

---

१ ऋग्वेद
२ अथर्ववेद
३ ऋग्वेद

**वेदे द्यूतनिषेधः कृषिप्रशंसाच :**

ऋग्वेदस्य दशममण्डले 'अक्षाख्य–धूतक्रीडाया' निन्दा निषेधश्चोपदिष्टः । तथा हि

अक्षैर्मा दीव्यः कृषिमित कृषस्व वित्ते रमस्व बहुमन्यमानः ।[१]

तत्र गावः कितव तत्र जाया तन्मे विष्टे सवितायमर्यः ॥

प्रसविता अयमीश्वरः आचष्टे द्यूतं मा कुरू । कृषिमेव कृषस्व, तत्सम्पादिते धने रतिं कुरू । द्यूते पराजितस्य का दशा भवति ।

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्वस्वित् ।

ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥[२]

कितवस्य भार्या तप्यते । मातापि संतप्ता भवति । अक्षपरा जयात् ऋणवान कितवः भयमापन्नः कस्यचिद् धनिनः गृहे रात्रौ चौर्यमुपगच्छति, इति कीदृशः स शोच्यः ।

**सृष्टिविज्ञानम् एवं वेदः**

अध्यात्मिकविज्ञाने सृष्टिविज्ञानम् एका तादृशीशृङ्खला विद्यते या अग्रे गत्वा ऊर्जा प्रददाति । ऋग्वेदस्य नासदीय सूक्तमन्त्राः अन्ये मन्त्राः च बहुषु स्थानेषु शृखलायाः कार्यं कुर्वन्ति । आधुनिकविज्ञानं चैतन्यांशेन यत्र द्विधा अनुभवति तत्र वैदिकसाहित्यं प्रजापति स्पष्टरूपेण प्रकटयति । सृष्टिप्रक्रिया का ? कि ? ज्ञातुं च किं कर्तव्यं तर्हि तत्र आर्षदृष्टानाम् ऋषीणां मुनीनां विचारान् विचिन्त्य मन्त्रज्ञानं वैदिकसाहित्यज्ञानं च अनिवार्यरूपेण प्राप्तव्यं

---

१ ऋग्वेद मण्डल–१०

२ ऋग्वेद

भवति येन सृष्टिविज्ञानं स्पष्टं निशङ्कितं च भवति । विष्णुः, प्रजापतिः, रूद्रः एतेषां देवानां सम्बन्धं यैः सूक्तैः सह सन्ति तेषां सूक्तानामध्ययनेन च आरण्यकोपनिषदां अध्ययनेन मननेन चिन्तनेन सृष्टेः सर्जनस्य, विकासस्य एवं जन्मनः उत्तरगतेः सम्यक् ज्ञानमपि वैदिकसाहित्यनैवस्यात् । भगवता श्रीकृष्णेन परमात्मना श्रीमद्भगवदगीतायां

"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।" अनया वेदस्य सृष्टिः, सृष्टेः संकोचः च रहस्यानां स्पष्टज्ञानं विद्याप्यते । त्रिगुणमायायाः त्रिगुणवेदान्तरूपेण दर्शनं भवति च असानोपसहितं चैतन्यस्य सृष्टेः प्रक्रिया भवति, न्यायवैशेषिकदर्शनाभ्यां च साङ्ख्यदर्शनेनापि सेश्वरनिरीश्वरवादानां कृतेऽपि वैदिकसाहित्यस्य सम्बन्धः स्पष्टीभवति । सृष्टिविज्ञानस्य ज्ञानाय शोधकार्यमपि विधातुं वैदिकसाहित्यस्य ज्ञानमनिवार्यमस्ति ।

**वेदे सांस्कृतिकतत्वम् ।**

वैदिकसाहित्यस्य अध्ययनेन जीवनमस्माकं सार्थकत्वं प्राप्नोति । वेदानां अध्ययनेन तस्य वैज्ञानिकत्वमपि स्पष्ट तया सिद्धं भवति । वर्णव्यवस्थायां वैज्ञानिकपक्षे पुरूषार्थचतुष्टये यज्ञविज्ञाने च भारतीयसांस्कृतिकस्तम्भेषु वैदिकसाहित्यस्यैव प्रभावोऽस्ति । एतस्मात् अतिरिक्तं भारतीयसंस्कृतिमध्ये एतस्याः अनुयायिनः ये सन्ति तेषामुपरि अपि वैदिकसाहित्यस्य प्रभावः वर्तते । प्राकृतिकसम्पत्तयः अपि धार्मिकानुष्ठाने आधारभूता अङ्गभूता च अतः नदीनां, पर्वतानां, वृक्षाणां प्रति पुण्यभाववत् व्यवहारः क्रियते । सर्वासु प्रकृतिषु देवभावः दृश्यते । देवदृष्ट्या सर्वत्र दृष्टव्यं इत्यपि ऋषिमुन्योः भावः दार्शनिकत्वं तथा च भगवदगीतानुसारं पण्डितलक्षणं यथा –

विद्या विनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।[1]
शुनि चैव श्वयाके च पण्डिता समदर्शिनः ॥

अनेन कारणेन पशुषु पक्षिषु सर्वप्राणिषु अस्मदीया दृष्टिः करूणामयी, आदरपूर्णा च भवेत्, इत्थं गीतास्मान्नुपदिशति । वैदिकसाहित्यस्य प्रभावेण, पठनेन च विश्वकल्याणस्य भावाः सहजाश्च प्रवृत्तयः भवन्ति अत एवैषा वैश्विकसंस्कृतिः । एताविधाः विश्वबन्धुत्वभावः, विश्वशान्तेरूपायाः वैदिकसाहित्ये नैकशः सदिवचाराः समुपलभ्यन्ते ।

वेदाध्येतुः विचाराः भवन्ति यत् ममैतदध्ययनं राष्ट्रकल्याणं करोतु मम तेजोवृद्धिच जनयतु । समाजः सुखयुक्तः शान्तिमयो भवेत तदर्थं तस्य प्रयत्नाः भवन्ति । वैदिकसाहित्यस्य स्थापना समाजस्य राष्ट्रस्य च समस्याराहित्यार्थं वर्तते । वैदिकमार्गः एव विश्वशान्त्यै योगदानं दास्यति, सन्देहरहितं मतमिदम् । अत एवोच्यते यत्, यत्र भवति विश्वैकनीडम् ।

**सामाजिकमहत्वम् ।**

अद्याधुनिकयुगे भारतेन सह नैकशः राष्ट्राणां समस्यापूर्ण व्यवहारणं विद्यते, किन्तु तासां समस्यानां समाधानानि न सन्ति कस्यापि समीपे । तासु समस्यासु आतंकवादः, निर्व्यवसायिनी हिंसा, जनाक्रमणं, रोगाक्रमणं, अत्याचारः, स्त्रीहिंसा, भ्रष्टाचारः इत्यादीनां समास्यानां समाधानं वैदिकविचारद्वारावश्यं शक्यम् ।

वेदान्तयज्ञेषु ये दार्शनिकविचाराः सन्ति तैः विचारैः सन्तोषधैर्यपुरस्सरं कर्मणि निष्ठा स्थिरा भवति । यथा –

१ श्रीमद्भगवद्गीता–५/१८

सोमो धेनुं सोमो अर्वन्तमाशु सोमो वीरं कर्मण्यं ददाति ।[१]

अर्थात् यः जनः यज्ञकर्म करोति तस्मै कर्म विधातुमथवा व्यापाराय सोमदेव धेनुं, हयांश्च ददाति । अनेन लघुद्योगाः स्वयम् आविष्कृताः भवन्ति । अर्थात् वैदिकसाहित्यं स्वीकृत्य जनः मानवः सवायत्तः, स्वतन्त्रः, स्वावलम्बी च भवतीति ज्ञानमिदं वेदादेवोपलभ्यते ।

द्वापरस्यान्ते युगानुरूपमानवबुध्यां ह्रासस्यास्थितिः दिव्यदृष्टयां दृष्टुं भगवान अपौरूषेय – शब्दराशिब्रह्मणः सार्वकालिकसुरक्षायाः दृष्ट्यां वैषयिक आधारे भगवान् कृष्णद्वैपायनवेदव्यासब्रह्मणः आज्ञया एक एव वेदस्य ऋक्, यजुः, एवं सामरूपेण विभक्तं कृतं, वेदत्रयीमवधारणायाः सुत्रयात् चकार ।

किञ्च, अर्वाचीनेषु ग्रन्थेषु बृहदारण्यक–महाभारतादिषु अर्थववेदस्यापि यन्नामग्राहमुल्लेखनमुपलभ्यते तत्चिन्तनीयम् । कुतः ? उच्यते तावताकालेनाथर्ववेदोऽपि विरचितः । भूदिति सम्भाव्यते इति । अतो वेदानां त्रित्वादेव तत्र त्रयीति व्यवहारो वास्तवो न प्रकार भेदकृतः इति तद्युक्तम्, ऋग्वेदेऽपि अथर्ववेदनामोल्लेखदर्शनात् ।

भगवता पतञ्जलिनापि स्पष्टमुदीरितम् –

"चत्वारो वेदाः साङ्गः सरदस्याः ।"

अतः यत्र कुत्रापि प्राचां लेखेषु वेदे त्रयीत्वव्यवहारः न स तत्वतुष्टित्वनिरासाय अपितु, केवलं तदवचनत्रैविध्यं मा लभ्येत इति दिक् । यथा 'वेदत्रयी' इत्यपत्यातां सबन्धे नैकशः मतानि यथा –

---

१ ऋग्वेद–९/९१/२०

"तेभ्यस्तपोभ्यस्त्रयो वेदा अजायन्त ।

अग्ने: ऋग्वेदो वायोर्यजुवेद: सूर्यात्सामवेद: ॥

एतदतिरिक्तं कृष्णद्वैपायनानुसारेण वेदचतुष्टयस्यावधारणास्ति । यथा –

व्यदधाद्यक्षसंतत्यै वेदमेकं चतुर्विधम् ।
ऋग्यजु: सामाथर्वाख्या वेदाश्चत्वार उद्धृता ।
इतिहास पुराणश्च पञ्चमो वेद उच्यते ॥

पुरूषसुक्तेऽपि तथोक्तम् – यत् –

तस्मात यज्ञात् सर्वहुत: ऋच: समानिजज्ञिरे ।[१]
छन्दांसि जज्ञिर तस्माद्यजुस्तमादजायत ॥

अर्थात् वेदा: चतुर्धा सन्ति ऋक् यजु:, साम, अथर्वति ।

एवं सामाजिकमहत्वपूर्णा: त्रिचतुर्वेदा: ज्ञानराशियुक्ता: विलसन्ति ।

एवं विधा: जनकल्याणकारिण उपदेशा: परामशाश्च वेदेषु निदिष्टा: सन्ति । तेषामनुष्ठानेन मानवसमाजस्य नितरांकल्याणं भवति ।

## १.७ वेदानां प्रादुर्भावविभाजनविषये मतम्

अस्मदीयमादिज्ञानस्रोत: वैदिकज्ञानं वेदविज्ञानमेव वा वर्तते । ऋग्यजुस्सामाथर्वसञ्जका: चत्वार: ज्ञानस्याधारभूतस्तम्भा: सन्ति । एतेऽपौरूषेया: वर्तन्ते । अत: मन्त्रोच्चारणात् प्राग्यदा विनियोगकाले येषामृषीणां नामोल्लेखो भवति, ते सर्वेऽपि ऋषयोमन्त्रद्रष्टार: अभवन् न तु मन्त्रकर्तार: । अस्या: धारणया: मुलभूतकारणं वर्तते येत् एकस्यैव मन्त्रस्य द्वावपि द्रष्टारौ

१ शुक्लयजुर्वेद

ऋष्यभवताम् । मनुस्मृत्यनुसारं तथा व शतपथाब्राह्मणानुसारम् अग्निवाआदित्याङ्गिरादिदेवानधिकृत्य क्रमशः ऋग्यजुस्सामथर्ववेदानां प्रादुर्भावः सञ्जातः । स्वयं ब्रह्मा श्रुतिप्रवचनरूपेण वेदविस्तारं चकार ।

यदा वेदान्नित्थं व्युत्पत्तिमूलकत्वेन विलोकयामश्चेत् तर्हि 'इष्टाप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । साक्षात्कृतधर्माणः ऋषयो बभुवुः । ते अवरेभ्यः असाक्षात्कृतधर्मेभ्यः उपदेशेन मन्त्रान् संप्रादुः । शास्त्रेषु कस्यापि व्यक्तेः वेदकर्तुः रूपेण उल्लेखोनास्ति, अस्मात कारणात् भारतीयवेदचिन्तकानां वेदव्याख्याकाराणां मतानुसारं वेदः स्वतः प्रमाणरूपंः वर्तते । अतः एते स्वयं ऋषीणां ध्यानावस्थासु प्रकाशितब्रह्मणः शब्दरूपः वा शब्दावताररेवास्ति । स्वतः प्रमाणमस्ति, तस्य तात्पर्यं यत् वेदप्रमाणस्य कृते कस्यापि अन्यशास्त्रस्य नास्त्यपेक्षा ।

As the oldest indian and also the oldest indogermanic literary mermument the vedadeser an outstanding place in the history of world literature.[१]

एतद् ब्रह्मपरमेश्वरस्य निःश्वासभूतं विद्यास्थानं वर्तते । प्रजापतेः निःश्वासभूतं वेदसंकुलप्रजापतेः रचना नास्ति, किन्तु प्रजापतेः माध्यमेन निःश्वासरूपेण प्रार्दुभूतमस्ति । यथा –

"युगान्तेऽन्तर्हितान् वेदान् सेतिहासान महर्षयः ।
लेभिरे तपसाः पूर्वमनुज्ञाताः स्वयंभूवाः ॥"

१ वेदो में नारी – १

अर्थात् युगान्ते अश्यमाना: वैदिकमन्त्रा: इतिहासेन सह ब्रह्मदेवस्य आज्ञया महर्षीणां तपोबलेन प्राप्ता: अभवन् ।

उपर्युक्त श्लोकपरिशीलनेन एतत्सष्टं प्रतीयते यत् वेदसृष्टि: पलयपर्यन्तं विद्यमाना एव ।

**पुराणेषु वेदाविर्भावमतम् :**

विभिन्नपुराणेषु वेदानाम् आविर्भावस्य विषयेऽनेकानि मतानि प्राप्यन्ते । यथा

(१) विष्णुपुराणस्य मतानुसारं विष्णु: एव वेदप्रवर्तकोऽस्ति ।

यथा –

एतद् ब्रह्म त्रिधा भेदमभेदमपि स प्रभु: ।
सर्वभेदेष्वभेदोऽसौ भिद्यते भिन्नबुद्धिभि: ॥

स ऋक्मयंस्साममय: सर्वात्मा स यजुर्मय: ।
ऋग्यजुस्सामसारात्मा स एवात्मा शरीरिणाम् ॥

स भिद्यते वेदमयस्स्ववेदं, करोति भेदैर्वहभिस्सशाखाम् ।
शाखा प्रणेता स समस्तशाखा, ज्ञानस्वरूपो भगवानसङ्ग: ॥

(२) भागवतपुराणानुसारं वेदाविर्भावमतम् ।

"कदाचिदध्यायत सददुर्वेदा आसंश्चतुर्मुखात् ।"
शास्त्रभिज्यां स्तुतिस्तोमं प्रायश्चितं व्याधात्क्रमात् ॥

आयुर्वेदं धनुर्वेदं गान्धर्व वेदमात्मन: ।
स्थापत्यं चासृजद् वेदंक्रमात्पूर्वादिभिमुखै: ॥

इतिहासपुराणानि पञ्चमं वेदमीश्वरः ।
सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥

एतदेव शिवपुराणे सूक्ष्मनादेन चतुर्ष्णां वेदानामुत्पत्तिः भवति । ब्रह्मवैवर्तपुराणे भगवत्या, तथा मत्स्यपुराणे गायत्त्या वेदानाम आविर्भाविः दर्शितः ।

उपर्युक्त प्राचीनपरम्परातिरिक्तं वेदानाम् आविर्भावविषये दर्शनानां, ज्योतिषशास्त्रस्य, शास्त्रनिष्णातानाञ्च विचाराः उपलभ्यन्ते ।

(१) मीमांसकानां, वेदान्तिनाञ्च मतानुसारं वेदाः अपौरूषेयाः, नित्याः, स्वयं प्रकटीभूताश्च सन्ति ।

(२) नैयायिकानां मतानुसारं वेदमन्त्राणां रचयिता ईश्वरः वर्तते । एवं ईश्वरः एव ऋषीणां वेदमन्त्राणां साक्षात्कारं कृतवान् । ईश्वीयज्ञानस्य कारणेन आप्तवाक्यत्वेन प्रमाणं वर्तते । यथा वाक्यं द्विविधं - वैदिकं लौकिकञ्च ।

"वैदिकमीश्वरप्रोक्तत्वात्सर्वमेव प्रमाणम् ।"
"निजशक्त्यभिव्यक्तः स्वतः प्रामाण्यम् ।"

वेदानां रचनायाः काल-विषये विचारयामः तर्हि प्राचीनाः भारतीयविद्वांसो वेदानपौरूषयान् मन्यन्ते, तेषां मते बुद्धिवैभवं वेदरचनाकालं निर्धारयन्ति । पाश्चात्यक्विारशरणविदो भारतीया अपि तेनैव मार्गेण वेदकालं निर्णेतुं यतन्ते । अत्रावसरसाम्यात् तद्विषकविचाराः प्रस्तूयन्ते ।

**वेदरचनाकाल निर्णयः**

वैदिकसाहित्यस्यैतिहासिकदृष्ट्या संहिताभागः प्राचीनतमो वर्तते । ब्रह्मणग्रन्थानां, उपनिषदां रचना तत्पश्चाव्जाता । ऐतिहासिकतत्वविवेचकानां मतानुसारेण संहितास्वपि ऋग्वेदसंहितैव प्राचीनतमा वर्तते । अन्य संहितोद्भवः तदनन्तरं जातः । अतः यदा वेदकालस्य निर्णयो भवति तदा ऋग्वेदस्वरूपं ज्ञात्वा वेदकाल निर्णयस्य विचारः क्रियते ।

वेदकालनिर्णयः जटिलसमस्यान्वितोऽस्ति । वैदिक भाषायाः काठिन्येन तथा अतिप्राचीनतायाः कारणेन वैदिकमन्त्राणां सत्यार्थबोधोऽपि क्लेशकारो भवति । अतः वेदकालनिर्णयेकस्यापि मतस्य स्थैर्यं न दृश्यते ।

भारतीयाः तथा च विदेशवासिनः तत्वचिन्तका अपि वैदिकज्ञानेनाकर्षिताः अभवन्, अतः तस्मात् कारणात् वेदकालनिर्णये भारतीयविदुषां तथा चेतरेषां विदुषामपि मतानां बाहुल्यं वर्तते । वेदकालनिर्णये सर्वेषामपि चिन्तनं स्वबुद्धि विवेकजनितमेवञ्च अनुमानपूर्वकमेव दरीदृश्यते । वेदानां पौरूषेयत्वात आद्यज्ञानस्वरूपत्वाच्च विभिन्नग्रन्थान्वेषण पूर्वकमेव वेदकालनिर्णयेऽनुमानं कर्तुं शक्यते । वेदामां कालनिर्णयकार्यं दुष्करमेवास्ति । अतः सर्वतत्वचिन्तकानां, प्रमुखत्वेन वेदविवेचकानां वेदकालनिर्णये विभिन्नमतानि दृश्यन्ते ।

**(१) मैक्समूलरमतेन वेदकालनिर्णयः ।**[१]

वेदकालनिर्णयस्य विषये मैक्समुलरमहोदयस्य प्रयत्नः महत्वपूर्णा मन्यते । तन्मतानुसारं प्राचीनोपनिषदि बौद्धसिद्धान्तानां दर्शनं भवति । यथा

१ वेदो में नारी – १

छान्दोग्योपनिषदि तथा च बृहदारण्यकोपनिषदि अहिंसायाः सिद्धान्तानां विशेषतया महत्वं प्रतिपादितमस्ति । अनेन विज्ञायते बौद्धकालस्य कतिपयवर्षपूर्वमेव उपनिषदां रचना सञ्जाता । गौतमबुद्धस्य प्रादुर्भावकालः श्विस्ताब्दात् पूर्वः षष्ठशताब्द्याः मध्यभागः मन्यते । अतः तत्प्रागेव उपनिषदां विकासस्य प्रारम्भो जातः । ब्राह्मणग्रन्थाः उपनिषद्भ्यः प्राचीनः सन्ति । मैक्समूलरः ब्राह्मणग्रन्थानां कालः इसवीयाब्दस्य अष्टमशताब्दी मन्यते । मैक्समूलरमतेन यजुस्सामाथर्ववेदानां रचनाकालः ईसवीयाब्दपूर्वं सहस्राब्दपर्यन्तं मन्यते । ऋग्वेदःसर्ववेदेषु प्राचीनतमः अतः तस्य रचनाकालः ई.पू.१२०० वर्षं यावत् निश्चितं क्रियते । मैक्समुलरः स्वयमेव स्वीकरोति तस्य कालगणना निश्चिता न वर्तते ।

(२) **तिलकमहोदयस्य तथा जेकोबीमहोदयस्य मतम्**[१]

लोकमान्यतिलकमहोदयः तथा जेकोषीमहोदयः ज्योतिषशास्त्रस्याधारेण वेदकालनिर्णयं कृतवान् तयोः मतानुसारेण ऋग्वेदस्य रचनाकालः ई.पू.४५०० वर्ष समीपस्यकालः वर्तते । सिद्धान्तोऽयं मन्त्राधारेण प्रतिपादितः । किन्तु मन्त्रार्थविषये विदुषां मतभेदो दृश्यते । अनेन कारणेन सिद्धान्तोऽयं सर्वमान्यो नाभवत् ।

(३) **डॉ. अल्टेकरमतम् ।**[२]

डॉ. अल्टेकरमहोदयः पौराणिकानां राजवंशानां परिशीलनपूर्वकं वेदकालनिर्णयं कृतवान् । सः वैदिकयुगास्म्भस्य ई.पू.२००० वर्ष

---

१ वैदिक साहित्य का इतिहास
२ वैदिक साहित्य का इतिहास

समीपकालं मन्यते । वेदव्यासः ई.पू.११०० वर्षसमीस्थकाले अन्तिमं सङ्कलनं चकार । अनेन वैदिकयुगस्य कालनिर्धारणं ई.पू.११०० तः ई.पू.२००० पर्यन्तं विधातुं शक्यते ।

(४) विन्टरनित्समहोदस्य मतानुसारं 'मितानी' शिलालेखस्याधारेण[१] वेदानां रचनाकालः २५०० ई. पूर्वं मन्यते ।

(५) डॉ. होप्किसनमहोदयस्य तथा डॉ. जेक्सनमहोदयस्य[२] मतानुसारं ऋग्वेदस्य रचनाकालं ई.पू.६०० तः१००० वर्षपर्यन्तं मन्यते ।

(६) डॉ. अविनाशचन्द्रः वेदे निर्दिष्टानि अनेकानि भूगर्भशास्त्रीयतत्त्वानि विशेषतः आर्यावतस्य चतुर्दिक्षु चतुः समुद्रीस्थितिगाधारीकृत्य गणनाद्वारा वेदस्य समयं २५ सहस्रासंवत्सरपूर्वं मन्यते । इदमित्थं मतं 'ऋग्वैदिक इण्डिया' नामके पुस्तके व्यक्तयानेन ।[२]

(७) डॉ. आर. जी भंडारकरः वेदमन्त्रस्याधारेण वेदानां कालः ६ सहस्राणि वर्षाणि ई.पू.मन्यते ।[३]

(८) स्वामीदयानन्दसरस्वतीमहोदयस्य मतानुसारेण वेदानां रचनाकालः वेदमन्त्राणामाधारेण सृष्टेः प्रारम्भो भवति ।[४]

---

१ वैदिक साहित्य का इतिहास
२ वैदिक साहित्य का इतिहास
३ वैदिक साहित्य का इतिहास
४ वैदिक साहित्य का इतिहास

## १.८ ऋग्वेदस्य परिचयः वैशिष्ट्यञ्च :

### १.८.१ 'ऋक्' शब्दस्यार्थः

'ऋचे' वा 'ऋक्' शब्दस्य अर्थोऽस्ति – स्तुतिपरकः मन्त्रः । 'ऋच्यते स्तूयतेऽनया इति ऋक्' । त्रिपादेन चार्येनोपेता वृतबद्धा मन्त्रा ऋच इति माधवः । स एष ऋषां समूह एव ऋग्वेदपदवाच्यः । यश्च सूक्तमण्डलाभ्यां ऋषिप्रवरेण शाकलेन विभाजितः । उक्तञ्च प्रातिशाख्ये –

''ऋचां समूह ऋग्वेदस्तमभ्यस्य प्रयत्नतः ।
पठितः शाकलेनादौ चतुर्भिस्तदनन्तरम् ॥

ऋग्वेदे विभिन्नदेवानां स्तुतिपरकाः मन्त्राः सन्ति अतोऽयं ऋग्वेदः कथ्यते । ब्राह्मणग्रन्थेषु ऋग्यजुसामशब्दानामेतेषां व्याख्या प्रस्तूयते आध्यात्मिका, दार्शनिका च । यथा – ऋक् भूलोकः वर्तते ।

सदकृतयोक्तत्वादेतत्सूक्तमित्युच्यते । सूक्तं स्तोत्रस्तोम मित्यनर्थान्तरम् । तथा बृहद्देवतायाम् –

''सम्पूर्णऋषिकाम्यन्तु, सूक्तमित्यभिधीयते ।''

### १.८.२ ऋग्वेदस्य परिचय :

ऋग्वेदः सनाधर्मस्य मूलग्रन्थः । चतुर्मुखब्रह्मणः पूर्वदिङ्मुखान्निसृत ऋग्वेदः । एतस्य १०१७ सूक्तानि सन्ति । पण्डितानां मतानुसारं ऋग्वेदस्य कालः ५००० वर्षेभ्यः प्राक् ।

ज्ञानार्थकसिद्धान्तोः निष्पन्नः वेदशब्दः । अपौरूषेयं वाक्यं वेदः इति सायणाचार्यः । इष्टानिष्टपरिहारयोः अलौकिकमुपायं यो वेदयति स वेदः

इति भाष्यभूमिकायाम्' । वेदः एव श्रुतिः, आम्नायः, आगमः इत्यादि श्रूयते । ब्रह्मणः मुखात् निर्गतं वेदं चतुर्धा विभज्य कृष्णद्वैपायनः वेदव्यासः सञ्जातः । एते वेदाः चत्वारः ऋग्–यजु–साम–अथर्वणः इति ।

**ऋग्वेदः**

ऋच्यते स्तूयते यया सा ऋक् । तादृशीनामृचां समूह एव ऋग्वेदः । यत्रार्थवशेन पादव्यवस्था सा ऋगिति मीमांसकाः । सः ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः । तत्र सूक्तं चतुर्विधम – ऋषिसूक्तदेवतासूक्तच्छन्दः सूक्तहोऽर्थसूक्तभेदात् । एकर्षिदृष्टमन्त्राणां समूहो ऋषिसूक्तम् । एकदेवताकमन्त्रणां समूहो देवतासूक्तम् । समानछान्दसां मन्त्राणां समूहो नामच्छन्दः सूक्तम् । यावदर्थसमाप्तानां मन्त्राणां समूहोऽर्थसूक्तम् । सुष्ठुत्वेन अभिहितत्वात् सूक्तमित्याख्यायते ।

सोऽयं ऋग्वेदः मण्डलानुवाकवर्गभेदेन अष्टकाध्याय सूक्तभेदेन च द्विधा । बालखिल्यसूक्तानि विहाय सम्पूर्णायामृग्वेदसंहितायां दशमण्डलानि, पञ्चाशीतिश्चानुवाकाः, अष्टोत्तरशतद्वयमिताश्च वर्गाः (इति प्रथमो भेदः) । अष्टौ अष्टकानि, षतुषष्टिः अध्यायः, सप्तदशोत्तरसहस्राणि च सूक्तानि (इति द्वितीयो भेदमार्गः) ।

मन्त्राश्च सर्वे दशसहस्रचतुः शतसप्तषष्ठिमिताः (१०४३७) इति शाकलः, शौनकानुक्रमणी तु दशसहस्रपञ्चाशतशीतिमितान् (१०५८०) मन्त्रान् आह । अत्र भेदे कालभेदेन मन्त्रवृद्धिलोपावेव हेतुतयोन्नेयौ भवतः । शब्दसंख्या – १५३८२६, अक्षर संख्या – ४३२००० । सर्वेऽपि मन्त्राः चतुर्दशसु छन्दस्सु विभक्ता बोध्याः ।

ऋग्वेदगतमन्त्रद्रष्टारो ऋषयः गृत्समदविश्वामित्रवामदेवात्रि भरद्वाजवसिष्ठादयः सन्ति ।

ऋग्वेदस्य दशसु मण्डलेषु नवमं मण्डलं पवमानमण्डल नामना प्रथितम् । तत्र हि सोमविषयकमन्त्रद्रष्टा से ऋषयो द्वितीयमण्डलतः सप्तमण्डलपर्यन्तगताभिः ऋग्भिः सम्बद्धाः, दशमण्डले मन्त्रा नानर्षिसम्बद्धाः । दशमे मण्डलो न केवलं देवतास्तुतय एव, अन्यप्रकारका अपि मन्त्राः दृश्यते ।

द्वितीयमण्डलादारभ्य सप्तममण्डलपर्यन्तस्य ऋग्वेदभागस्य रचना सर्वतः प्राचीनाः, दशमं मण्डलं सर्वेतोऽर्वाचीनम्, शेषाणि मध्यकालिकानीति साम्प्रतिका आलोचकाः कथयन्ति ।

सोऽयम् ऋग्वेदः सूक्तमण्डलेन द्विधा विभक्तः । तत्र तदेतत्सूक्तं चतुर्विधम् ऋषिर्विधम् ऋषिसूक्तम्, देवतासूक्तं, छन्दः सूक्तम्, अथर्वसूक्तञ्चेति । तत्रेकर्षिदृष्टमन्त्राणां समूहः ऋषिसूक्तम्, एकदेवताकमन्त्राणां समूहः देवतासूक्तम्, समानच्छन्दसां मन्त्राणाञ्च समूहः पुनःछन्दः सूक्तं, यावदर्थसमाप्तमन्त्राणां समूहः अर्थसूक्तमुच्यते ।

'देवतार्थर्षिछन्दोभ्यो वैविध्यं तस्य जायते ।
ऋषिसूक्तंयावन्ति सूक्तन्येकस्य वैकृतिः ॥
स्तूयेतैका तु यावत्सु तत्सूक्तं दैवतं विदः ।
यावदर्थसमाप्तिः स्यादर्थसूक्तं वदन्ति तात् ॥
समानच्छान्दसो मन्त्राश्च्छान्दः सूक्तं तदुच्यते ॥''

ऋग्वेदस्य परिभाषा एतस्मिन् श्लोके दृश्यमाना भवति । यथा –

ऋग्वेद: श्वेतरूप: स्थान–द्विभुजो रासभाननः ।[1]

अक्षमालाश्वर: सौम्य: प्रीतो व्याख्यायनोद्यत: ॥

सोऽयं ऋग्वेद: मण्डलानुवाकवर्गभेदेन, अष्टकाध्यायसूक्तभेदेन च द्विधा विभक्त: । बालखिल्यसञ्ज्ञकानि षोडशसूक्तानि विहाय अखिलसंहिताया दश(१०) मण्डलानि पञ्चाशीति(८५) अनुवाका: ।

अष्टोत्तरशतद्वय(२००८) मिताश्च वर्गो: । अष्टाकाष्टं चतुषष्टि (६४), अध्याय: । सप्तदशोत्तरसहस्राणि (२०१०) सूक्तानि सन्ति ।

चतुदर्श (१४) छान्दोनिबद्धाश्च समे मन्त्रा: । ते सर्वेऽपिमन्त्रा: दशसहस्रचतु: शतसप्तषष्टि (१०४६७) परिमिता: । तत्र महर्षिशौनकस्यानुक्रमणीनुकध्य सर्वे मन्त्रा दशसहस्रपञ्चशतोत्तराशीति (१०५८०) यावत् । शब्दास्तु एकलक्षत्रिपंचाशत्सहस्राष्टशतोत्तरषडविंशति (१५३८२६) संख्यका: वर्तन्ते । अक्षराणि च पुनश्चतुलक्षद्वात्रिंशत्सहस्र (४३००) परिमितानि । मरस्य शाकलसंहितानुंगुण्येन गणना तु शौनकानुक्रमणीं न संवदति । कतिपयमन्त्राणां विलोपायत्ति: सुलभसम्भवा । इति कृत्वैवैष भेद आपन्नो गम्यते । यथा हि –

ऋचा दशसहस्राणि ऋचां पञ्चशतानि च ।

ऋचामशीतिपादाश्चैतद् पारायणमुच्यते ॥

मन्त्राणाञ्च संख्या १०५८० शौनकीयानुक्रमणीमत्तानुसारेण । परन्त्वत्र मतानि भिद्यन्ते विदुषाम् । विनिगमनाभावात् यथार्थसंख्याया: उल्लेखो न सुकर: । स च भेद: शतदुशतमन्प्राणामन्तरालमेवालभ्यते । ततोऽधिकं तदत्र युक्तायुक्तविवेकधनपरा: विपश्चित एव प्रमाणम् ।

---

१ ऋग्वेदभाष्यभुमिका ।

स चायम् 'ऋग्वेदः' 'अग्निमीळे' इति प्रथमसुक्ताग्निमन्त्रादारभ्य अन्तिमसुक्तस्यान्तिमेन 'समानी वा आकुति' रिति मन्त्रेण च समाप्तः समुल्लखति । अग्निसूक्तेनारब्धः सञ्ज्ञानसूक्तेन समाप्त इति भावः ।

**१.८.३ ऋग्वेदकालः**

अधुना लोके सर्वत्र उपलभ्यमानेषु सर्वेषु ग्रन्थेषु प्राचीनतमः अयम् ऋग्वेदः सर्वज्ञानस्याधारभूतः भवति । अस्य रचनाकालस्य निर्णये सर्वपण्डितमण्डलेषु भिन्नाभिप्रायो दृश्यते । तथापि अस्माभिः भारतीयैः वेदस्य अपौरूषेयत्वं मन्यमानैः ऋग्वेदस्यास्यापि अनादित्वं प्रकल्पितम् । अत्र मन्त्रद्रष्टार एव ऋषयः न तु कर्तारः ॥

वेदस्य अपौरूषेयत्वं स्वीकर्तुसमर्थैः पाश्चात्यकोविदैः ऋषिप्रणीतः वेदः इति निर्धार्य प्राचीनतमस्य अस्य कालः क्रि.पू.२००० वर्षतः ६००० पर्यन्तं मन्यते । परन्तु लोकमान्यबालगङ्गाधरमहाभागेन वेदवर्णितनक्षत्रविषयक सूचनामवलम्ब्य गणितेन ज्योतिषेण च वेदरचनाकालः क्रि.पू.६००० वर्षतः पूर्वमेवेति निश्चियः कृतः ।

वेदगतभूगर्भशास्त्रसिद्धान्तमनुसृत्य डॉ. अविनाशचन्द्रमहोदयेन अनेकलक्षवर्षपूर्वमेव अस्य रचना सम्पन्ना इति प्रख्यापितम् । इत्येम्भूते सति अस्मत्प्राचीनैः यद्वेदस्य औरूषेयत्वम् अनादित्वं च कल्पितं तत्सवीकारे का क्षतिः ? एवमेव वेदरचनाकालवादेन अस्माभिः ज्ञातुं शक्यते वेदेषु प्राचीनस्य ऋग्वेदस्य कालः अपि ।

**१.८.४ ऋग्वेदस्य क्रमीकरणम् ।**

ऋग्वेदस्य एकविंशति शाखाः सन्ति कालक्रमेन तद्विलुप्य याः शाखाः

सन्ति तासु आश्वलायन – शाकल – बाष्कलाशाखाः प्रसिद्धाः । अत्र शाकलसंहितायां दशमण्डलानि प्रतिमण्डले नानासुक्तानि । प्रत्येकं सूक्ते नात्राऋचः च सन्ति । एवं ऋग्वेदे आहत्य १०२६ सूक्तानि ९९०० मन्त्राश्च वर्तते ।

अत्र मन्त्रद्रष्टारः ऋषयः गृत्समद–विश्वामित्र–अत्रि–भरद्वाजवसिष्ठादयो भवन्ति । शाकलसंहितायाः नवमण्डलं पवमाननाम्ना प्रसिद्धम् । अत्र सोमविषयकमन्त्राणां सङ्कलनमस्ति । प्रथमाष्टमण्डलयोः कण्ववंशीयनामाङ्गिरसगोत्रजानामन्येषां च ऋषीणां मन्त्राः दृश्यन्ते । अनुसन्धानकुशलैस्तु द्वितीयमण्डलमारभ्य अष्टमण्डलपर्यन्तं प्राचीनतमो भागः नवमण्डलं तदनन्तरभूतं प्रथमाष्टाममण्डले अर्वाचीने दशमण्डलम् अर्वाचीनतममिति निर्धारितम् ।

ऋग्वेदस्य ब्राह्मणभागद्वयं ऐतरेयकौषीतकीति आरण्यकानि ऐतरेय कौषीतकि – शाङखायनादीनि त्रीणि दश उपनिषदश्च विद्यन्ते ।

वेदेषु आदिमः ऋग्वेद हिन्दुधर्मस्य मूलग्रन्थः अस्ति । ऋग्वेदः ४५०० वर्षेभ्यः प्राग् सङ्ग्रथितः इति ते मन्यन्ते । अत्र १०१७ सूक्तानि सन्ति । तस्य श्लोकाः विविधदेवानां सम्बद्धाः सन्ति–यथा इन्द्रः, अग्निः, वायुः इत्यादयः । ऋग्वेदस्य १०५८९ संहिताः, १०२८ सूक्तानि च १० मण्डले विभाजिताः सन्ति । महामुनिव्यासस्य निर्देशे पैलः ऋग्वेदस्य संहितानां निर्माणम् अकरोत् । यज्ञेषु देवताहवानेऽयं वेदभाग उपयुज्यते । यज्ञेषु ऋग्वेदमन्त्रपठनकर्ता "होता" इत्युच्यते । आयुर्वेदः ऋग्वेदस्य उपवेदः ।

## १.९ ऋग्वेदस्य महत्वम्

जानीमो वयं यत् भारतवर्षस्य प्राचीनतमः ग्रन्थः ऋग्वेदः विद्यते । प्राचीनत्वात् समग्रसुरभारतीसाहित्ये प्रभावः पतितो दृश्यते । दर्शनशास्त्रे येषां प्रश्नानां समाधानं नोपलभ्यते तेषां सम्यक् निराकरणं तत्र ऋग्वेदे भवति । भवतु पश्चात् मायायाः, प्रेत्यभावः, संसारसत्ता, जीवस्यस्वरूपं, जीवेश्वरसम्बन्धः इत्यादिः यत् किमपि स्यात् ऋग्वेदः शङ्कां छिनत्ति । षड्दर्शनवत एव व्यावहारिकपक्षेण ऋग्वेदः प्रश्नान् निराकरोति । ऋग्वेदस्य ऋषयः स्पष्टभाषया सरलस्वभावेन च स्वोक्तिभिः देवेभ्यः द्रव्यं प्रयच्छन्ति । एतादृशं सर्वं तत्र विपुलप्रमाणेन संप्राप्यते । जीवनस्य आध्यात्मिकानां कमस्यानां समाधानं सम्यक्तया तत्र प्रतिपाद्यते । तत्र तत् स्थाने एकतत्वं, प्रतिष्ठा, मूलतत्वम् इत्यादिकं सर्वं प्रस्थापितमस्ति । यथा –

"एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।"

वास्तविकरूपेण कः तादृशः वक्ता वा कः जानाति यत् अस्य वेदस्योत्पात्तः कुतः कया रीत्या कथञ्च जाता ? तथैव सृष्टिविषये प्रश्नः यत् एषा कुतः कथं समागता निर्गता वा । तस्य ज्ञानं उत्तरं वा कुत्र अस्ति ?

व्याकरणशास्त्रेतिहासस्य प्रारम्भेऽपि ऋग्वेद जातः । व्याकरणशास्त्रस्य प्रशंसाये तत्र ऋचः सन्ति । कुत्रचित् "कामानां वर्षकः पुरकः नाम–आख्यात –उपसर्ग–निपातादीन निरूपयति वेदोऽयं । तथा भूतभविष्यवर्तमानाः कालाः तत्र निर्दिष्टा सन्ति । सुप्तिङौ शीर्षेस्तः । सप्तविभक्तयो हस्तरूपिण्यः सन्ति । ऋग्वेदरूपः महान् देवः मुनुष्याय किं न ददाति अर्थात् सर्वं प्रयच्छति । स्फूटवाणी सर्वं प्रददाति ।

चत्वारिशृङ्गा त्रयो अस्य पादा द्वेशीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभा रोरर्वाति महो देवो मर्त्या आविवेश ॥

प्रतिकत्वेन् सर्वप्रकारस्य ज्ञानस्य स्रोत: तत्रोपलभ्यते । अस्य प्रतिकरूपस्य अज्ञानस्येव विकार: परवर्तिसाहित्यरूपेण पश्चात् जात: पल्लवितभूतस्य ज्ञानस्य यदा वेदार्थरूपेण सहायता अपेक्षते तदा वेदान्तं सम्यक् सहाय्यं लभ्यते अत एव कथितं यत् –

इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरदिति ॥[1]

पुराणेषु येषां पर्वतानाम् उड्डयनं दर्शितं तत् तत्र ज्ञानं न भवति किन्तु वेदे लिखितं यत् पर्वत: अर्थात् मेध: अपि भवति अत: ज्ञानं जातं नान्यथा प्रश्नो भवति पर्वतानां उड्डयनं कथं शक्यम् ? किन्तु एतादृशानां प्रश्नानां समाधानं ऋग्वेदात् सम्भवति। ।

इन्द्रसम्बन्धितानां व्याख्यानानां स्रोत: ऋग्वेदात् प्रवहति । इन्द्रस्य एकं नाम शतक्रतु: तस्य भावज्ञानं अर्थबोध: ऋग्वेदजनितव्युत्पत्या स्पष्टीभवति । शतयज्ञान्ते इन्द्रपदं प्राप्यते इति पश्चात् सर्वे: वेदार्थमाध्यमेन ज्ञानम् । शतयज्ञकर्ता देवराजपदं प्राप्नोति स: तस्य पदस्य अधिकारी भवति । अत्रावसरे अत्र मनोविज्ञानं आगच्छति यत् क: तादृश: जन: य:स्वकीयं एतादृशं स्थानं पदं सहजतया अन्यस्मै दद्यात् ? अधिकारी भवति चेदपि न ददाति एतादृशं स्थानं वा अधिकारी स्यात् । तत: इन्द्र विध्नहर्तारूपेण प्रतिष्ठित: जात: । अस्य रूपस्य वर्णनं प्राय: पुराणे एवोपलभ्यते । अस्य विवेचनान्ते ज्ञानं भवति यत् आर्याणां वीरताया: मानदण्ड:

---

१ पुराणविमर्श:

इन्द्रः आसीत् । व्यतीते समये जनाः तादृशं विचारयन्ति स्म इन्द्रः अर्थात् स्वार्थपूर्णः, पदवाञ्छुः, ईर्ष्याकर्ता देवः आसीत् ।

ऋग्वेदे एव आर्यजातेः प्राचीनतमस्य इतिहासस्य सामग्री उपलब्धा वर्तते । पुरातत्वपरम्परायाः अपि स्थानं तत्र विद्यते । भारतीयेतिहासस्य निधिक्रमः श्रीलंकायां महावंशनाम्नः पालिग्रन्थे बुहस्य जन्मावसरे प्रारभ्यते । पुराकाले तु समयस्य ज्ञानं अनुमानमात्रेणैव भवति स्म । प्रागेतिहासिकरूपेण वा तेन नाम्ना अपि तस्य समयस्योल्लेखः अभवत् ।

यथा धार्मिकपक्षः ज्ञान-विज्ञानपक्षः समेषां प्राचीनतमज्ञानेन अद्यतनज्ञानं यावत् याः उपलब्धयः तेषां क्रमपूर्वकं निरूपणं वर्णनम् अर्थात् इतिहासः एव ऋग्वेदः अस्यां व्याख्यायां प्रथमः इतिहासग्रन्थः सिद्धयति । ऋग्वेदः उपरिनिर्दिष्ट सर्वक्षेत्राणां ज्ञानप्रदाने सर्वथा मान्यभूतः ग्रन्थः तथाधिकाधिकप्रमाणपूर्णा सहायता विदधाति ।

अस्माकं सद्भाग्यं यत् ऋग्वेदः धार्मिकं महत्वं विशेषेण धारयति । तस्य फलस्वरूपेण अस्माभिः आचारस्य, विचारस्य, चिन्तनप्रक्रियायाः, उच्चारणस्य, शिष्टभाषायाः, धार्मिकविश्वासस्येत्यादीनां विषयाणां साक्षात्कारः सम्यक्तया जायते ।

ऋग्वेदानां मन्त्राणां महत्वम् अत्र प्रतिपादितम् तेषाम् अपि उच्चयते यत् सर्वेषु वेदेषु ऋग्वेदस्य महत्वं सर्वोपरी वर्तते । यथा ऋग्वेदभाष्यभूमिकान्तर्गतमपि श्रीसायणाचार्यमहोदयः वदति –

एतस्मिन् प्रथमोऽध्यायः श्रोतव्यः सम्प्रदायतः ।[१]
व्यत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान् ॥

---

१ ऋग्वेदभाष्यभूमिका

आर्याजात्यां प्राचीनतमे उपलब्धसाहित्ये रूपे ऋग्वेदस्य महत्वं सदैव अक्षुण्णः अभवत् । भारतवर्षस्य तु प्रत्येकम अनुवर्ती साहित्यरूपस्य एतद् उपजीव्यम् अस्ति, एवमेतदेव कारणमस्ति यत् वर्तमानसर्वेषु क्षेत्राणां शोधनिष्कर्षः तावदपूर्णः विद्यते यावत् तस्य समर्थकं ऋग्वेदस्य उद्धहरणं न दीयताम् ।

## १.१० यजुर्वेदस्य परिचयः वैशिष्ट्यञ्च

यजूंषि गद्यानि । अध्वर्युणा यज्ञे उपयुज्यमाना मन्त्रा एवात्र यजुर्वेदे सङ्कलिताः, यज्ञस्य वास्तविकं विधानमध्वर्युरेव विद्धाति, अतोऽयं यजुर्वेदो यज्ञविधेइतिसन्निकृष्टं सम्बन्धं स्थापयति ।

यजुर्वेदो द्विप्रकारकः (१) कृष्णयजुर्वेदः (२) शुक्लयजुर्वेदः ।

पौराणिकाः कथयति – व्यासो वैशम्पायनाय वेदं प्रोवाच, स स्वशिष्याय याज्ञवल्क्याय । कुतोऽपि कारणाद् कारणाद्रुष्टो वेशम्पायनो याज्ञवल्क्यमुवाच देहिमदधीतं वेदमिति । याज्ञवल्क्यो गुरूवचनपालनाय ततोऽधीतं वेदं सद्यो वान्तवान् । अन्ये वैशम्यायनशिष्यास्तित्तिरिरूपं धृत्वा याज्ञवक्येन वान्तं वेदं गृहीतवन्तः । स एवायं वान्तगृहीतो वेदः कृष्णयजुर्वेदः ।

वैशम्पायने कुपिते ततोऽधीतं वेदं विसृज्य याज्ञवल्क्यः पुनर्वेदाधिगतये सूर्यमाराधयामास, ततश्च वेदमापतोऽयं वेदः शुक्लयजुर्वेदनाम्नाऽप्रथत । अनयोः वेदयोर्महदन्तरम् ।

शुक्लयजुर्वेदे विनियोगवाक्यरहिताः केवला मन्त्राः विद्यन्ते, कृष्णयजुर्वेदे तु विनियोगवाक्यानि मन्त्राश्च । अतोमिश्रितरूपतया शुक्लयजुर्वेदः, मिश्रितरूपतया च कृष्णयजुर्वेद इति सञ्ज्ञा जातेत्यपि लोकाः कथयन्ति ।

सोऽयं यजुर्वेदः ४० अध्यायान्, ३०३ अनुवाकान्, १९७५ कण्डिका(मन्त्रान) २९६२५ शब्दान्, ८८८७५ अक्षराणि च बिभर्ति । अस्य वेदस्य प्रथमेऽध्याये दर्शपौर्णमासौ, द्वितीये पिण्डपितृयज्ञः, तृतीयेऽग्निहोत्रं चातुर्मास्येष्टिः, चतुर्थाध्याय – यादष्टमाध्यायपर्यन्तमग्निष्टोमविधानं सोमयागः, नवमे वाजपेयो राजसूयश्च, दशमे सौत्रामणिः, एकादशाध्याय दष्टादशाध्यायपर्यन्तम् अग्निः चयम्, उखाभरणम्, चितयः रुद्रहः, शत्तरूद्रियम, वसोर्धारा, राष्ट्रभृच्च । एकोनविंशतितमाध्यायात् परिशिष्टमारभ्यते, विंशे एकविंशे च सोमसम्पादनविधिः, तदनु पञ्चविंशतिपर्यन्तमश्वमेधः, ततः शेषे भागे पुरूषमेधसर्वमेधपितृमेधादिविवरणञ्च प्रयञ्चितम् । अन्तिमश्चाध्याय ईशावास्योपनिषद्रुपः ।

शुक्लयर्जुवेदस्य संहितैव वाजसनेयिसंहिता कथ्यते । तादृशनामकरणे बीजं त्विदं कथ्यते यत् याज्ञवल्क्येनाराधितः सूर्यो वाजी भूत्वा तस्मै वेदं प्रोवाच । अतस्तदुक्तासंहिता वाजसनेयी संहिता समाख्या ।

शुक्लयजुर्वेदस्य माध्यन्दिनशाखा कण्वशाखा चेति द्वे शाखे । प्रथमा उत्तरभारते प्राप्यते, द्वितीया च महाराष्ट्रे । अनयोः शाखयोः संहिते भिन्ने सत्यावपि स्वल्पमेव भेदं धारयतः, बहुष्वंशेषु साम्यं दृश्यते ।

कृष्णयजुर्वेदस्य चतस्रः शाखा प्राप्यन्ते –

(क) तैत्तिरीयशाखा – इयं प्रधानशाखा, अत्र सप्तखण्डाः, ते च खण्डाः अष्टशब्देन काण्डशब्देन व्यवह्रियन्ते । प्रतिकाण्डं कतिपयेऽध्यायः ये प्रपाठकनाम्ना ख्याताः । इमे प्रपाठका बहुष्वनुवाकेषु विभक्ताः सन्ति ।

(ख) मैत्रायणीसंहिता इमे द्वे अपि संहिते तैत्तिरीयसंहितामनुकुरुतः,

(ग) काठकसंहिता केवलं क्रमे यत्र तत्र पार्थक्यं विद्यते ।

आर्याणां कुरूषु अधिनिवेशकाले संग्रथितो युजुर्वेद इति अभिप्रायः । यजुर्वेदस्य अध्वरवेद इति नामान्तरमस्ति । यजुषः एकोत्तरशतं शाखाः सन्ति इति पतञ्जलिः प्रयञ्चहृदयकारः च प्रस्तौति । वाजसनेयापरनाम कृष्णयजुर्वेदः गद्यपद्यात्मा । यदीया रचना विश्ववश्या देदीप्यते । शुक्लयजुर्वेदः मुख्यतया यज्ञस्य कृते एवास्ति । इतोऽप्यधिकं यजुर्वेदस्य महत्वं सर्वत्र सुरवाणीसाहित्ये यत्र-तत्र सर्वत्र विलसति, किन्तु विस्तारभयादत्र समाप्यते ।

## १.११ सामवेदस्य परिचयः वैशिष्ट्यञ्च ।

यज्ञे चत्वारो ऋत्विजो भवन्ति - १ होता, २ अध्वर्युः ३ उद्गाता, ४ ब्रह्मा होता-आहवानकर्ता, स हि यज्ञावसरे प्रकान्नादेवतानां तत्कार्याय सङ्कल्तिा मन्त्राः स्तुतिरूपतया ऋचः समाख्याताः, तेषां संग्रह एव ऋग्वेदः । अध्वर्यर्विधिवद्यज्ञं सम्पादयति, तत्रावश्यकमन्त्रा यजूंषि, तत्संग्रहो यजुर्वेदः उद्गाता-उच्चस्वरेण गानकर्ता, स हि स्वरबद्धान् मन्त्रानुच्चैर्गायति, तदपेक्षितमन्त्रसंग्रहः सामवेदः । ब्रह्मायज्ञनिरीक्षकः कृताकृतावेक्षणकर्मा, सहि सर्वविद्यमन्त्रज्ञः, तदपेक्षितो मन्त्रराशिरथर्ववेद इति कथ्यते ।

सामवेदस्य गानप्रचुरता प्रथिता, ऋच एव गीयन्ते, सामवेदे १५४९ मन्त्रा सन्ति, तेषु ७५ मन्त्रा ईदृशा ये 'ऋग्वेदे' न प्राप्यन्ते, शेषाः सर्वेऽप्युभयवेद्साधारणाः । सामवेदागत मन्त्राणां सप्त स्वराः, यतस्ते गीयन्ते,

ऋग्वेद पुनस्तेषमिव मन्त्राणां त्रय एव स्वराः त्रय एव स्वराः एतावतेव उभयवेद-साधारणानां साममन्त्राणामृग्वेदमन्त्रभ्यो भेदः ।

सामवेदो द्विधा विभज्यते - पूर्वार्चिकम्, उत्तरार्चिकं च । पूर्वार्चिकमेव छन्दः, छन्दसी, छन्दसिका चेति त्रिभिरपि नामभिरभिधीयते । विषयानुसारं पूर्व्राचिकं चतुर्षभागेषु विभज्यते - आग्नेयपर्व (अग्निसम्बन्धिनीभि ऋग्भिपेतम्), ऐन्द्रपर्व (इन्द्रसम्बन्धिनीभिर्ऋग्भिर्युतम्) पवमानपर्व (सोमविषयकम'), आरण्यकपर्व च ।

उतरार्चिकन्तु, अनुष्ठाननिद्धिर्देशकम् । तस्य बहवो विभागाः - दशरात्रं, संवत्सरम्, ऐकाहम, अहीनम्, सत्रम्, प्रायश्चितं, क्षुदञ्चेति प्रमुखास्तत्र भेदाः ।

साम-सान्त्वेन इति धातोः निष्पन्नं सामपदम् । सा इति ऋक्सूचकतया अम इति गानम् । स्वरादिव्यञ्जकतया च व्याख्यां केचिद् वदन्ति । सामवेदस्य एकसहस्रं शाखाः आसन् । प्रयञ्चहृदयकारस्य काले द्वादशशाखाः विहाय अन्याः नष्टाः इदानीन्तु केवलं तिस्रः शाखा समुपलभ्यन्ते । सङ्गीतस्य उद्भवः सामगानात् इति विचक्षणा आचक्षते । सामगानेऽपि सप्तस्वरा एव भवन्ति । ते आधुनिकशास्त्रीयसङ्गीतसंविधानात् आरोहावरोहणक्रमे किञ्चिदिव व्यत्यस्ताः दृश्यन्ते । खरहरप्रियारागतुल्याः सामगानस्वराः कुष्ठं (प्रथमं) द्वितीयं, तृतीय (मध्यमम्), चतुर्थं मन्त्रं (पञ्चमम्), अतिस्वायं (षष्ठम्), अतिस्वरम् (अन्यं) एते सप्तस्वराः । सामगानालापने गायकैः हस्ताङ्गुलीभिः मुद्राः अभिनीयन्ते एताभ्यः मुद्राभ्यः स्वरस्थानानि मात्राश्च प्रतीयन्ते । तथा च गीताप्रमाणम् -

"देवानां सामवेदोऽस्मि"[1]

वचनमिदं साक्षात् भगवता श्रीकृष्णेनाभिहितम् एतत् सुचयति यत् – अयं सामवेदः चतुर्षु वेदेषु प्रमुखं स्थानं वहति । इतोऽप्यधिकं सामवेदस्य महत्वं सर्वत्र देववाणीवैदिकसाहित्ये यत्र तत्र सर्वत्र सप्तस्वरानिव देदीप्यते, किन्तु विस्तारभयादत्रैव समाप्नोमि ।

## १.१२ अथर्ववेदस्य परिचयः वैशिष्ट्यञ्च ।

अभिचारक्रियायाः प्रथान्येन प्रतिपादकोऽयं वेदः । अथर्वनामकर्षिणा दृष्टत्वात् अथर्ववेद इत्यप्युच्यते । अथर्ववेदे २० काण्डानि, ७३१ सूक्तानि, ५९८७ मन्त्रा विद्यन्ते । एषु मन्त्रेषु द्वादशशतमन्त्रा ऋग्वेदेऽपि दृश्यन्ते । विंशतिकाण्डे १५३ सूक्तानि, तेषु द्वादशसूक्तानि अतिरिच्य शेषाणि सर्वाण्यपि ऋग्वेदस्य दशममण्डले समुपलभ्यन्ते ।

अथर्ववेदस्य नव शाखा आसन्, परं सम्प्रति शौनकपिप्पलादसमाख्ये द्वे एव शाखे प्राप्येते । प्रचलिता अथर्वसंहिता शौनकशाखान्तर्गता, पिप्यलादशाखासंहिताऽपि अनतिचिरेणैव मुद्रिता ।

अथर्ववेदस्य उपलब्धेषु अनेकाभिधानेषु अथर्ववेद – ब्रह्मवेदअंगिरावेद – अथर्ववागिरेवेदादीनि नामानि प्रमुखतां भजन्ते । 'थर्व' धातुः कौटिल्यार्थकः तथा हिंसावाचकः अस्ति । अत एव "अथर्व" शब्दस्य अर्थोऽस्ति यत् अकुटिलवृत्त्या, अहिंसवृत्त्या च मनसः स्थैर्यप्राप्तकर्ता व्यक्तिः ।

अथर्वागिरस्यदस्य व्याख्याकरणे सति प्रतीयते यत् ऋषिद्वयेन दृष्टानां मन्त्राणां समूहरूपः एव अथर्ववेदः । अथर्वदृष्टामन्त्राः शान्तिप्रयुष्टिकर्मयुक्ताः

---

१ श्रीमद् भगवदगीता – अ.१०

सन्ति, परन्तु, अंगिरेदृष्टाः मन्त्राः अभिचारिकाःसन्ति । वेदेऽस्मिन् मारणमोहनोच्चाटनादीनां ज्वरायस्मारादिरोगविनाशकानाञ्च मन्त्राणां संग्रहोऽस्ति ।

ब्रह्मपुत्रेण अथर्वेण समाहृता इति अथर्ववेदः अन्वर्थं नाम । अथर्वाङ्गिराः, ब्रह्मवेदः इति नामान्तराणि । आथर्वसंहितायाः द्वे शाखे स्तः । शौनकीयशाखा, पैप्पलादशाखा चेति

भूर्जपत्रेषु शारदालिप्या लिखितस्य अथर्ववेदस्य पुरातनं पुस्तकं काश्मीरीयैः सम्पादितं वर्तते । तदद्य टयुबिञ्जन सर्वकलाशालायाः ग्रन्थसंग्रहेऽस्ति ।

**अथर्ववेदस्य वैशिष्ट्यम्** –

अथर्ववेदे नैकविधं वैशिष्ट्यमस्ति । तत्तस्य केषाञ्चित् मन्त्राणां भावात्मकार्थविवेचनेन विज्ञायते । यथा –

"गृहे वसतु नो अतिथिः ॥"[१]

अर्थात् अस्मगृहे अतिथयः वसन्तुः । अस्माकम् आहवानम् अङ्गीकृत्य ये आगच्छन्ति ते न अतिथयः, अपि तु अभ्यागताः । अनिरीक्षितरूपेण आगन्तारः अतिथयः । इदमत्रातिथ्यधर्मविज्ञानं प्रतिभाति । गृहस्थाश्रमे च पारस्परिकं स्नेहः कथं सिद्धयति तदिह दर्शितम् । यथा –

"जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥"[२]

---

१ अथर्ववेदः – १०–६–५
२ अथर्ववेदः – ३–३०–२

मन्त्रार्थः संक्षिप्तोऽयमित्थं विद्यते । पत्नीं भर्तारं मधुराणि शान्तिदायकानि वचनानि वदन्तु । पत्नीं यथा मधुरं शान्तिदायकं वदेत् तथैव पतिः अपि पत्नीं मधुराणि शान्तिदायकानि वचनानि वदेत । नीतिनियमसम्बद्धानि वचनानि पुरूषमहिलायोः पतिपत्न्योः कृते समानया अन्वेति । कुटुम्बे सामरस्यं यदि अपेक्षितं तर्हि उभाम्यामपि स्वीयानि कर्तव्यानि समीचीनतया निर्वहणीयानि । केन प्रथमं कृतं, कीयता प्रमाणेन कृतमित्यादीनि चिन्तनानि न भवेयुः । इदमेव प्रेम, त्यागः । मातापुत्रयोः केषाञ्चन मासानां सामीप्यं भवति । दीर्धकालं यावत् विद्यमानः अत्यन्तं निकटसम्बन्धः भवति पतिपत्न्योः । मधुरं शान्तियुतञ्च सम्भाषणम्, आत्मीयः व्यवहारश्च शारीरकातीतं सामीप्यम् आनयति । अस्मिन् सामीप्ये हितं, निरातङ्क, सामञ्जस्यं, शान्तिः, समाधानं, शक्तिः प्रेरणा च प्राप्यन्ते यानि भवन्ति अन्यानि अमूल्यानि च । सम्भाव्यमानान् भेदान् गौणीकृत्य इदं सामीप्यं यदि साधयेम तर्हि शान्ति - समाधान - सुरक्षा - स्वास्थ्यादयः अस्मदीयाः भविष्यन्ति । अधिकमपि यथा - "मा भ्राता भ्रातरं क्षिक्षत् ॥[१]

सहोदरः सहोदरं न द्विष्यात् । सहोदरा अपि सहोदरां न द्विष्यात् । अभिप्रायाणाम् आचरणानां च विरोधः, सम्पत्त्यादयः विषयः एव प्रायः द्वेषस्य कारणं भवति । रीतिनीतयः यदि सीमचीनाः तर्हि विरोधः न कार्यः समीचीनाः यदि न स्युः तर्हि अपि द्वेषः न कार्यः । शान्तिः समाधानं, प्रीतिः, प्रेम, त्यागः तृप्तिः, आरोग्यम् इत्यादयः एव जीवने महासम्पदाः । अशाश्चतस्य सम्पद्स्य निमित्तं कलहः मौदयद्योतकः । शाश्वतस्य सम्पदस्य सम्पादने यत्नरताः स्यामः । ततोऽधिकं सार्वत्रिकं, वैश्वविकं, समृद्धिसंवर्धनं कथं स्यात् ? तदपि प्रोक्तमिह । यतो हि -

१ अथर्ववेदः - ३-३०-३

समानी प्रपा सह वो अन्नभाग:[1]

भवतां जलाशया: अन्नभागा: च समाना: भवन्तु । जलम् आहारश्च जीवमात्राय तया विश्वचेतनशक्तया दत्तानि अमूल्यानि उपायनानि । जलं सर्वेषाम् । सर्वेषांम् तद्विषये समान: अधिकार: विद्यते । तेनैव सह जलमूलानां संरक्षणस्य उत्तरदायित्वमपि अस्माकं विद्यते । आदौ वृष्टिजलस्य सम्पूर्ण: सदुपयोग: कर्तव्य: । तत: गर्तकासारादिषु नदिकासु च तत् वृष्टिजलं सङ्गृह्य उपयोक्तव्यम् । आवश्यकतायां सत्यां कूपखनेन जलं प्राप्तव्यम् । कदापि अस्य जलस्य दुरूपयोग: न कर्तव्य:, जलमालिन्यं न करणीयम् । मानवानाम् आहार: भवन्ति सस्यानि । भूमि:, गोभर:, जलं, सूर्यशक्ति:, वर्धनसामर्थ्यम् इत्यादीनि सर्वाणि भगवत: एव । एतान् एकत्र संयोज्य परिसरस्नेहयुता स्वाभाविकी कृषि: अस्माभि: क्रियते । वयं निमित्तमात्रम् । मिलित्वा परिश्रमपूर्वकं कार्यँ कृत्वा प्राप्तं फलं सर्वै: सह संविभज्य जीवनमेव मानवजीवनम् ।

## १.१२ वेदोत्तरवैदिकसाहित्यपरिचय:

### चत्वार: उपवेदा:

आयुर्वेद:, धनुर्वेद:, गान्धर्वेद:, स्थापत्यवेदश्चेति क्रमश: चतुष्णां वेदानामुपवेदा कात्यायनेन दर्शिता: सन्ति ।

(१) स्थापत्यवेद:-इह स्थापत्यकलाविषयकं विशदं ज्ञानं निहितमस्ति । 'वास्तुशास्त्रं' वास्तुकला' एतदन्तर्वर्तिज्ञानं वर्तते ।

---

१ अथर्ववेद - ३-३०-६

(२) धनुर्वेदः – अत्र धनुर्विद्यासम्बद्धं ज्ञानं प्राप्यते ।

(३) गन्धर्वेद – संगीतफलाविषयकं ज्ञानमिहोपलभ्यते ।

(४) आयुर्वेदः – आरोग्यसम्बद्धं, आयुर्विज्ञानसमन्वितं सर्वप्रकारकं ज्ञानमत्रोपलभ्यते ।

**ब्राह्मणः**

ब्राह्मणः हिन्दुधर्मस्य पवित्रतमानां सर्वोच्चधर्मग्रन्थानां वेदानां गद्यव्याख्यावान् खण्डोऽस्ति । अयं वैदिकवाङ्मयस्य द्वितीयांशोऽस्ति यत्र गद्यरूपेण देवतानां यज्ञे, कर्मकाण्डस्य च व्याख्या कृतास्ति, मन्त्राणां च भाष्यमपि विहितं दृश्यते । अस्य भाषा वैदिकं संस्कृतमस्ति । प्रत्येकं वेदानामेकाधिकः ब्राह्मणः वर्तते । वर्तमानकाले उपलभ्यमानाः ब्राह्मणग्रन्थाः इत्थं सन्ति ।

(१) ऋग्वेदः

– ऐतरेय ब्राह्मणः (शाकलशाखायाः)

– कौषीतकि, शांखायनः वा ब्राह्मणः (बाष्कलशाखा)

(२) सामवेदः

– प्रौढ (पंचविंशः) ब्राह्मणः ।

– षड्विंशब्राह्मणः ।

– आर्षेयब्राह्मणः ।

– मन्त्रः (छान्दोग्यः) ब्रह्माणः ।

– जैमिनीय (तावलकरः) ब्राह्मणः ।

(३) यजुर्वेदः

शुक्ययजुर्वेदः ।

– शतपथब्राह्मणः (माध्यन्दिनीशाखायाः) ।

– शतपथब्राह्मणः (काण्वशाखायाः) ।

कृष्णयजुर्वेदः ।

– तैत्तिरीयब्राह्मणः ।

– मैत्रायणीब्राह्मणः ।

– कठब्राह्मणः ।

– कपिष्ठलब्राह्मणः ।

(४) अथर्ववेदः

– गोपथब्राह्मणः ।

**आरण्यकः**

आरण्यकः हिन्दुधर्मस्य पावनकारिवेदस्य धर्मग्रन्थस्य गद्यात्मकखण्डः वर्तते । अत्र दर्शनस्य ज्ञानस्य तत्वचिंतनं निरूपितमस्ति, कर्मकाण्डविषयकं न किमपि । अस्य भाषामाध्यमं वैदिकसंस्कृमस्ति । मंत्रब्राह्मणयोर्वेदनामधेयम् । ब्राह्मणस्य भागत्रयेषु आरण्यकः अन्यतमभागोऽस्ति ।

सायणाचार्यस्य मतानुसारं नामकरणस्य कारणमस्ति यत् ग्रन्थानामेतेषां पठनमध्ययनं वा अरण्ये भवति स्म । आरग्यकस्य मुख्यविषयः यज्ञभागानुष्ठानं न भूत्वा तदन्तवर्तिनी आध्यात्मिकमीमांसा वर्तते । वस्तुतः यज्ञानुष्ठानं

नितरामेकं रहस्यपूर्णः प्रतीकात्मको व्यापारोऽस्ति, प्रतीकस्यास्या समग्रविवरणं आरण्यग्रन्थेषु प्रदत्तमस्ति । प्राणविद्यायाः महत्वमपि प्रतिपादनं ग्रन्थेष्वेतेषु विशेषेण विहितं विद्यते । तात्पर्यमस्ति यत् उपनिषद् आरण्यकेषु सङ्केतितान् तथ्यान् विशद्तया व्याख्यायति । इत्थं संहितोपनिषदोः मध्यवर्तिनी श्रृंखला साहित्येनानेन परिपूर्यते ।

**प्रमुखाः आरण्यकग्रन्था :**

## (१) ऐतरेय आरण्यकः

ग्रन्थस्यास्य सम्बन्धः ऋग्वेदेन सहास्ति । ऐतरयारण्यके पञ्च मुख्याध्यायाः सन्ति, तेषु प्रथमत्रयाणां रचयिता ऐतरेयः, चतुर्थस्य आश्वलायनः तथा पञ्चमस्य शौनकः मन्यते । डॉ.कीथ अस्य निरूक्तापेक्षया अर्वाचीनं मत्वा रचनाकालः विक्रमपूर्वः षष्ठशताब्द्याः मन्यते, वस्तुतः निरुक्तात् अयं प्राचीनतरोऽस्ति । ऐतरेयस्य प्रथमत्रयाणामारण्यकानां कर्ता महिदासः वर्तते । सश्चातः ऐतरेयब्राह्मणस्य समकालीनं मन्तुं न्याय्योऽस्ति ।

## (२) शाङ्खायनः

अस्यापि सम्बन्धः ऋग्वेदेन वर्तते । अयं ऐतरेयारण्यकस्येव वर्तते, तथा पञ्चदशाध्यायेषु विभक्तः वर्तते । यस्य एकांशः (तृतीयाध्यायात् षष्ठाध्यायं यावत्) कौषीतकि उपनिषद् नाम्ना प्रसिद्धोऽस्ति ।

## (३) तैत्तिरीय आरण्यकः

दशसु परिच्छेदेषु (प्रपाठकेषु) विभक्तोऽस्ति, यच्च 'अरण' इति नाम्ना कथ्यते । अत्र सप्तमाष्टमनवमान् प्रापाठकान् सम्मिल्य 'तैत्तिरीय उपनिषद्' कथ्यते ।

**(४) बृहदारण्यक :**

वस्तुतः शुक्लयजुर्वेदस्य एक एव आरण्यकः वर्तते, किन्तु आध्यात्मिकतत्वानां प्राचुर्येण उपनिषदयं गव्यते ।

**(५) तवलकार आरण्यकः ।**

सामवेदेन सम्बद्ध एक एव आरण्यकः अस्ति । यत्र च चत्वारः अध्यायाः सन्ति, प्रत्येकेषु चाध्यायेषु नैके अनुवाकाः वर्तन्ते । चतुर्थाध्याये दशमानुवाके प्रसिद्धः तवलकारः वा केन उपनिषद वर्तते ।

सर्वस्य वेदस्य एकाधिकः आरण्यकोऽस्ति । अथर्ववेदस्य कोऽपि आरण्यकः नोपलभ्यते ।

**ऋग्वेदः**

(१) ऐतरेय आरण्यकः

(२) शाङ्खायन आरण्यकः ।

सामवेदः

(१) तवलकारः (वा जैमिनीयोषनिषद्) आरण्यकः ।

(२) छान्दोग्य आरण्यकः ।

यजुर्वेदः

(१) शुक्लः

- बृहदारण्यक

(२) कृष्णः

– तैत्तिरीय आरण्यकः

– मैत्रायणी आरण्यकः

अथर्ववेदः

– कोऽपि नोपलभ्यते ।

**उपनिषदः**

वेदान्ता उपनिषद इत्याख्यायन्ते । उपनिषच्छब्दस्य रहस्यमर्थः, अध्यात्मविद्यारहस्यप्रतिपादका वेदभागा उपनिषदः कथ्यन्ते । मुक्तिकोषनिषदि उपनिषदां संख्या १०८ कथिता । त अत्र १० उपनिषदः ऋग्वेदसम्बद्धाः, १९ उपनिषदः शुत्रलयजुर्वेदसम्बद्धाः । ३२ कुष्णयजुर्वेदसम्बद्धाः, १६ सामवेदसम्बद्धः, ३१ अथर्ववेदसम्बद्धाः । वेदान्ताचार्या एतासूयनिषत्सुकतिचनोपनिषदः स्वमतानुसारिव्याख्यया भूषितवन्तः । तासु दशोपनिषदः प्रसिद्धा – ईश–केन–कठ–प्रश्न–मुण्ड–माण्डुस्य–तैत्तिरीय–ऐतरेय – छान्दोग्य–बृहदारण्यकोपनिषदः । श्वेताश्वेतरोपनिषदेकादश्यति प्रसिद्धा ।

**उपनिषद् नाम का ?**

उप नि पूर्वकस्य विशरणेगत्यवसादनार्थकस्य षद्लृ धातोः निष्पन्नः शब्दः एव उपनिषदिति । उपनिषीदतीति उपनिषत् । वेदस्य रहस्यविद्यासहग्रहात्मको भागः गुरूसमीपतः पठनीयतत्त्वांशः एव उपनिषद् । इयमुपनिषत् प्रस्थानत्रये अन्यतमः श्रेष्ठः भागः । प्रस्थानत्रयं नाम ब्रह्मसूत्रम् भगवद्गीता च । भारतीयदर्शनानां मूलभूताः उपनिषदः एव ।

**उपनिषत्भागाः ।**

सर्वोप्रनिषदां मध्ये सारमष्टोतं शतम् इत्येतस्मात् अनेकाः उपनिषदः । तत्र प्रसिद्धाः अष्टोरशतंचतिज्ञायते । तथापि उपलभ्यमानासु १०८ उपनिषत्सु दशोपनिषदः सुप्रसिद्धाः श्रीमदाचार्यशङ्करभगवत्पादानां भाषैः अलकृताश्च ।

ईश–केन–कठ–प्रश्न–मुण्ड–माण्डुक्य–त्तैतरि
ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश ॥ इति

मुक्तिकोपनिषदि १०८ उपनिषदां नामानि सन्ति यत्र ऋग्वेदस्य १०, शुक्लयजुर्वेदस्य १६, कृष्णयजुर्वेदस्य ३१, सामवेदस्य १६, अथर्ववेदस्य ३२, उपनिषदः सन्ति । काश्चन वेदान्तसिद्धान्तप्रतिपादकाः काश्चन योगोपदेशिकाः काश्चन संन्याससवर्णनपरकाः काश्चन विष्णोः शिवस्य शक्तेः वा प्रशंसिकाः ।

**उपनिषत् सूची १०८**

| | | | |
|---|---|---|---|
| (१) | ईश | – | शुक्लयजुर्वेदस्य मुख्य उपनिषत् |
| (२) | केनोपनिषत् | – | सामवेदः, मुख्य उपनिषत् |
| (३) | कठोपनिषत् | – | कृष्णयजुर्वेदः मुख्योपनिषत् |
| (४) | प्रश्नोपनिषत् | – | अथर्ववेदः मुख्योपनिषत् |
| (५) | मुण्डकोपनिषत् | – | अथर्ववेदः मुख्योपनिषत् |
| (६) | माण्डुक्योपनिषद् | – | अथर्ववेदः मुख्योपनिषत् |
| (७) | तैत्तिरीयोपनिषत् | – | कृष्णयजुर्वेद मुख्योपनिषत् |

| | | | |
|---|---|---|---|
| (८) | ऐतरेयोपनिषत् | – | ऋग्वेदः मुख्योपनिषत् |
| (९) | छान्दोग्योपनिषत् | – | सामवेद मुख्योपनिषत् |
| (१०) | बृहदारण्यकोपनिषत् | – | शुक्लयजुर्वेदः मुख्योपनिषत् |
| (११) | ब्रह्म–उपनिषत् | – | कृष्णयजुर्वेदा, संन्यास उपनिषत् |
| (१२) | कैवल्य–उपनिषत् | – | कृष्णयजुर्वेदः, शैव उपनिषत् |
| (१३) | जाबाल उपनिषत् | – | शुक्लयजुर्वेदः संन्यास उपनिषत् |
| (१४) | श्वेताश्वेतर उपनिषत् | – | कृष्णयजुर्वेदः सामान्य उपनिषत् |
| (१५) | हंस उपनिषत् | – | शुलयजुर्वेदः योग उपनिषत् |
| (१६) | आरूणेय उपनिषत् | – | सामवेदः संन्यास उपनिषत् |
| (१७) | गर्भउपनिषत् | – | कृष्णयजुर्वेदः, सामान्य उपनिषत् |
| (१८) | नारायण उपनिषत् | | |
| (१९) | परमहंस उपनिषत् | | |
| (२०) | अमृत बिन्दु पनिषत् | | |
| (२१) | अमृतनादोपनिषत् | | |
| (२२) | अथर्व शिरोपनिषत् | | |
| (२३) | मैत्रायणि उपनिषत् | | |
| (२४) | कौषीतकि उपनिषत् | | |

(२५) अथर्वशिखोपनिषत्

(२६) ब्रहञ्जाबल उपनिषत्

(२७) नृसिंहतापनी उपनिषत्

(२८) कालाग्निरुद्र उपनिषत्

(२९) मैत्रेयि उपनिषत्

(३०) सुबाल उपनिषत्

(३१) क्षुरिक उपनिषत्

(३२) मान्त्रिक उपनिषत्

(३३) सर्वसारोपनिषत्

(३४) निरालम्ब उपनिषत्

(३५) शुकरहस्य उपनिषत्

(३६) वज्रसुचि उपनिषत्

(३७) तेजो-बिन्दु उपनिषत्

(३८) नाद-बिन्दु उपनिषत्

(३९) ध्यानबिन्दु उपनिषत्

(४०) ब्रह्मविद्या उपनिषत्

(४१) योगतत्व उपनिषत्

(४२) आत्मबोध उपनिषत्

(४३) परिव्रात उपनिषत्

(४४) त्रिषिखि उपनिषत्

(४५) सीता उपनिषत्

(४६) योगचुडामणि उपनिषत्

(४७) निर्वाण उपनिषत्

(४८) मण्डलब्राह्मण उपनिषत्

(४९) दक्षिणामूर्ति उपनिषत्

(५०) शरभ उपनिषत्

(५१) स्कन्द उपनिषत्

(५२) महानारायण उपनिषत्

(५३) अद्वयतारक उपनिषत्

(५४) रामरहस्य उपनिषत्

(५५) रामतापणि उपनिषत्

(५६) वासुदेव उपनिषत्

(५७) मुद्गगल उपनिषत्

(५८) शाण्डिल्य उपनिषत्

(५९) पैगल उपनिषत्

(६०) भिक्षुक उपनिषत्

(६१) महत उपनिषत्

(६२) शारीरिक उपनिषत्

(६३) योगशिखा उपनिषत्

(६४) तुरीयातीत उपनिषत्

(६५) संन्यास उपनिषत्

(६६) परमहंस परिव्राजक उपनिषत्

(६७) अक्षमालिक उपनिषत्

(६८) अव्यक्त उपनिषत्

(६९) एकाक्षर उपनिषत्

(७०) अन्नपूर्ण उपनिषत्

(७१) सूर्य उपनिषत्

(७२) अक्षि उपनिषत्

(७३) अध्यात्मा उपनिषत्

(७४) कुण्डिक उपनिषत्

(७५) सावित्री उपनिषत्

(७६) आत्मा उपनिषत्

(७७) पाशुपात उपनिषत्

(७८) परब्रह्म उपनिषत्

(७९) अवधूत उपनिषत्

(८०) त्रिपुरातपनि उपनिषत्

(८१) देवि उपनिषत्

(८२) त्रिपुर उपनिषत्

(८३) कठरुद्र उपनिषत्

(८४) भावन उपनिषत्

(८५) रुद्रहृदय उपनिषत्

(८६) योगकुण्डलिनि उपनिषत्

(८७) भस्म उपनिषत्

(८८) रुद्राक्ष उपनिषत्

(८९) गणपति उपनिषत्

(९०) दर्शन उपनिषत्

(९१) तारसार उपनिषत्

(९२) माहावाक्य उपनिषत्

(९३) पञ्चब्रह्म उपनिषत्

(९४) प्राणाग्निहोत्र उपनिषत्

(९५) गोपालतपणि उपनिषत्

(९६) कृष्ण उपनिषत्

(९७) याज्ञवल्य उपनिषत्

(९८) वराह उपनिषत्

(९९) शात्यायनि उपनिषत्

(१००) हयग्रीव उपनिषत्

(१०१) दत्तात्रेय उपनिषत्

(१०२) गारुड उपनिषत्

(१०३) कलि–सण्दारण उपनिषत्

(१०४) जाबाल (सामवेद) उपनिषत्

(१०५) सौभाग्य उपनिषत्

(१०६) सरस्वतीरहस्य उपनिषत्

(१०७) बहवृच – उपनिषत्

(१०८) मुक्तिक

**वेदाङ्गानि ।**

वेदाङ्गानि हिन्दुधर्मस्य ग्रन्थानि सन्ति । शिक्षा, कल्पः, व्याकरण, ज्योतिष, छन्दः, निरुक्तम् इति षट्वेदाङ्गानि सन्ति ।

(१) शिक्षा – अत्र वेदमन्त्राणांमुच्चारणस्य विधिः दर्शितास्ति पाणिनीयशिक्षा भारते विशेषेण मननीया वर्तते ।

(२) कल्पः – वेदांना कः मन्त्रः कुत्र प्रयोक्तव्यः कर्मणि, इत्यस्य कथनं कृतमस्ति । अस्य तिस्रः शाखाः वर्तन्ते – श्रौतसूत्रं, गृह्यसूत्रं, धर्मसूत्रञ्च ।

(३) व्याकरणम् – अनेन प्रकृतिप्रत्ययाः दीनां योगेन शब्दसिद्धिः उदात्तानुदात्तस्परितस्वराणां स्थितिः बोध्यते ।

अत्र व्याकरणे भारते पाणिनेः व्याकरणमद्य प्रसिद्धमस्ति । अस्य अष्टाध्यायी पाणिनेः पतञ्जलेः महाभाष्यम्, भट्टोजीदीक्षितस्य कौमुदीटीकां सुप्रसिद्धास्ति ।

(४) निरुक्तः – वेदेषु येषां शब्दानां प्रयोगः येषु येष्वर्थेषु विहितोऽस्ति, तत्तच्छब्दानां निश्चयात्मकरूपेण उल्लेखः निरुक्ते कृतमस्ति ।

निरुक्तस्य ग्रन्थेषु यास्काचार्यस्य निरुक्तः प्रसिद्धः वर्तते ।

(५) ज्योतिषम् – अनेन वैदिकयज्ञानाम् अनुष्ठानामाञ्च समयः विज्ञायते । अत्र ज्योतिषेण 'वेदाङ्गाज्योतिषं' विज्ञेयम् ।

(६) छन्दः – वेदेषु प्रयुक्तं गायत्री, उष्णिक् आदीनां छन्दसां रचनायाः ज्ञानेन छन्दशास्त्रेण जायते । प्रत्येकेषु छन्दत्सु कति पादानि भयन्ति,

ह्रस्वदीर्घाद्यक्षराणि प्रत्येकपादे कथं भवेयुः, विषयोऽयमस्यास्ति ।

इत्थं वेदस्याङ्गभुतानीभानि वेदवाङ्मयशरीरे कथं स्थानं भजन्ते, तदित्थं वर्ण्यते । यथा –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठयते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

इतोऽप्यधिकं विस्तृतं भवितुं शक्यते किन्तु विस्तारभयादत्रैय समाप्यते ।